निश्चिते मुहूर्ते लोककल्याणार्थं शिवपार्वत्योः विवाहः महता वैभवेन सुसम्पन्नः[2] । तत्र सप्त ऋषयः एव ऋत्विजः । विवाहानन्तरं वधूवरौ पितामहं

---

1. honoured 2. took place / was celebrated

ब्रह्माणं नमस्कृतवन्तौ । पितामहः - ''हे कल्याणि ! वीरपुत्रं प्राप्नुहि[3]'' इति आशीर्वचनानि उक्तवान् । शापात् मुक्तः मन्मथः तत्र एव आसीत् ।

ततः महेश्वरः पार्वत्या सह कैलासपर्वतम् अगच्छत् । तत्र पार्वत्या सह जलक्रीडादिविहारेषु प्रवृत्तः सः आनन्देन कालं यापितवान्[4] ।

अन्यत्र लोके तारकासुरस्य पीडा प्रत्यहम् अधिका जाता । पीडया दुःखिताः इन्द्रादयः अग्निं हरसमीपं प्रेषितवन्तः । सः अग्निः कपोतरूपेण[5] ईश्वरस्य शय्यागृहं प्रविष्टवान् । तं दृष्ट्वा हरः अतीव क्रुद्धः । अग्निः इन्द्रादीनां दुरवस्थां निवेदितवान् । तेषां सन्देशं च उक्तवान् । तदा हरः स्वकीयं तेजः अग्नौ निक्षिप्तवान् । अग्नेः अनुचितप्रवेशात् पार्वती क्रुद्धा । सा अग्निम् उद्दिश्य - ''त्वं सर्वभक्षकः भव । पवित्रम् अपवित्रं सर्वं भक्षय । कुष्ठरोगेण पीडितः भव । सर्वदा धूमावृतः[6] भव'' इति अशपत् । एवं विरूपः अग्निः शिवस्य तेजः गृहीत्वा प्रतिगतः । सः इन्द्रस्य सूचनानुसारेण हरतेजः गङ्गायां प्रक्षिप्तवान् । गङ्गया तत् तेजः शरवणे[7] निक्षिप्तम् । शरवणे कुमारस्य जन्म अभवत् ।

प्रश्नाः

१. शिवाय कन्यां पार्वतीं याचितुं हिमवतः समीपं के गताः ?

२. विवाहानन्तरं वधूवरौ कं नमस्कृतवन्तौ ?

३. देवानां सन्देशं शिवाय कः नीतवान् ?

४. अग्निः हरतेजः कुत्र प्रक्षिप्तवान् ?

५. श्लोकेषु अन्वयक्रमः

६. अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।।

पदविभागः

अन्येद्युः[1], आत्मानुचरस्य[2], भावम्[3], जिज्ञासमाना[4], मुनिहोमधेनुः[5], गङ्गाप्रपातान्तविरूढशष्पम्[6], गौरीगुरोः[7], गह्वरम्[8], आविवेश[9] ।।

---

3. get 4. spent 5. in the guise of a pigeon. 6. covered with smoke; 7. in the thicket of reeds.

अन्वयः

अन्येद्युः मुनिहोमधेनुः आत्मानुचरस्य भावं जिज्ञासमाना गङ्गाप्रपातान्त-विरूढशष्पं गौरीगुरोः गह्वरम् आविवेश ।।

प्रतिपदार्थः

अन्येद्युः - on the following day, मुनिहोमधेनुः - (Nandini) the sacrificial cow of the sage (Vasishtha), जिज्ञासमाना - desirous of knowing, भावम् - the mind, आत्मानुचरस्य - of her attendant, आविवेश - entered, गह्वरम् - a cave, गङ्गाप्रपातान्तविरूढशष्पम् - which was filled with grass grown on the steep banks of the Ganges, गौरीगुरोः - of Himavan (the father of Gouri).

तात्पर्यम्

एकविंशतिदिनानि गतानि । द्वाविंशतितमे दिने एका घटना अभवत् । मुनिधेनुः नन्दिनी दिलीपस्य भावं परीक्षितुम् इष्टवती । अतः सा तस्मिन् दिने गङ्गाप्रपाते यत्र तृणानि बहूनि आसन्, तादृशम् एकं महागह्वरं (गुहां) प्रविष्टवती ।

अन्वयरचना

आविवेश - प्रविष्टवती - *क्रियापदम्*
का आविवेश ? - मुनिहोमधेनुः - *कर्तृपदम्*
कीदृशी मुनिहोमधेनुः ? - जिज्ञासमाना
कं जिज्ञासमाना ? - भावम्
कस्य भावम् ? - आत्मानुचरस्य
किम् आविवेश ? - गह्वरम्
कीदृशं गह्वरम् ? - गङ्गाप्रपातान्त-विरूढ-शष्पम्
कस्य गह्वरम् ? - गौरीगुरोः
कदा आविवेश ? - अन्येद्युः

विशेषः

अ) पदविवरणम्

1. अव्ययम् 'अन्येद्युः'
2. अकारान्तः 'आत्मानुचर'शब्दः पु. ष.वि. ए.व.

3. अ. 'भाव'शब्दः पु. द्वि.वि. ए.व.
4. आ. 'जिज्ञासमाना'शब्दः, स्त्री. प्र.वि. ए.व.
5. उ. 'मुनिहोमधेनु'शब्दः, स्त्री. प्र.वि. ए.व.
6. अ. 'गङ्गा....शष्प'शब्दः, न. द्वि.वि. ए.व.
7. उ. 'गौरीगुरु'शब्दः, पु. ष.वि. ए.व.
8. अ. 'गह्वर'शब्दः, न. द्वि.वि. ए.व.
9. आङ्-उपसर्गपूर्वकः 'विश्'धातुः, प.प. भूतकालः (लिट्), प्र.पु. ए.व.

आ) समासः

१. आत्मनः अनुचरः, तस्य - ष. *तत्पुरुषः*
२. होमस्य धेनुः - होमधेनुः - ष. *तत्पुरुषः*
मुनेः होमधेनुः - ष. *तत्पुरुषः*
३. गङ्गायाः प्रपातः - गङ्गाप्रपातः - ष. *तत्पुरुषः*
गङ्गाप्रपातस्य अन्तम् - गङ्गाप्रपातान्तम् - ष. *तत्पुरुषः*
विरूढं च तत् शष्पं च - विरूढशष्पम् - *कर्मधारयः*
गङ्गाप्रपातान्ते विरूढशष्पं यस्मिन् तत् (गह्वरम्) - *बहुव्रीहिः*
४. गौर्याः गुरुः - गौरीगुरुः, तस्य - ष.*तत्पुरुषः*

अनन्तरक्षणे केनचित् क्रूरेण सिंहेन नन्दिनीधेनुः आक्रान्ता । नन्दिनी आक्रन्दनं कृतवती । राजा सिंहम् अपश्यत् ।

**७. ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गात् उद्धर्तुमैच्छत् प्रसभोद्धतारिः ॥**

पदविभागः

ततः[1], मृगेन्द्रस्य[2], मृगेन्द्रगामी[3], वधाय[4], वध्यस्य[5], शरम्[6], शरण्यः[7], जाताभिषङ्गः[8], नृपतिः[9], निषङ्गात्[10], उद्धर्तुम्[11], ऐच्छत्[12], प्रसभोद्धतारिः[13] ।

अन्वयः

ततः मृगेन्द्रगामी शरण्यः प्रसभोद्धतारिः नृपतिः जाताभिषङ्गः वध्यस्य मृगेन्द्रस्य वधाय निषङ्गात् शरम् उद्धर्तुम् ऐच्छत् ।

प्रतिपदार्थः

ततः - Then , नृपतिः - the king, मृगेन्द्रगामी - whose gait resembled the lion's, शरण्यः - who offered protection (to anyone who sought it), प्रसभोद्धतारिः - who vanquished his enemies by force, जाताभिषङ्गः - but was now defeated (because even while he was watching the cow was dragged away by a lion), वध्यस्य मृगेन्द्रस्य वधाय - in order to kill the lion that deserved to be killed, ऐच्छत् - wanted, उद्धर्तुम् - to takeout, शरम् - an arrow, निषङ्गात् - from the quiver.

तात्पर्यम्

अनन्तरं यदा दिलीपः सिंहम् अपश्यत्, धेनोः आक्रन्दनं च अशृणोत्, तदा तस्य अपमानः अभवत् । सः शत्रूणां विनाशने पटुः । आश्रितानां रक्षणेऽपि समर्थः । सिंहेन नन्दिनी आक्रान्ता । तत्क्षणे एव दिलीपः सिंहं मारयितुं तूणीरात् बाणं स्वीकर्तुम् इष्टवान् ।

अन्वयरचना

ऐच्छत् - इष्टवान् - *क्रियापदम्*
कः ऐच्छत् ? - नृपतिः - *कर्तृपदम्*
कीदृशः नृपतिः ? - जाताभिषङ्गः
पुनः कीदृशः ? - प्रसभोद्धतारिः
पुनः कीदृशः ? - शरण्यः
पुनः कीदृशः ? - मृगेन्द्रगामी
किं कर्तुम् ऐच्छत् ? - उद्धर्तुम्
कम् उद्धर्तुम् ? - शरम्
कस्मात् उद्धर्तुम् ? - निषङ्गात्
किमर्थम् ? - वधाय
कस्य वधाय ? - मृगेन्द्रस्य
कीदृशस्य मृगेन्द्रस्य ? - वध्यस्य
कदा ऐच्छत् ? - ततः

विशेषः

अ) पदविवरणम्

1. अव्ययम् 'ततः'
2. अ. 'मृगेन्द्र'शब्दः, पु. ष.वि. ए.व.
3. न. 'मृगेन्द्रगामिन्'शब्दः, पु. प्र.वि. ए.व.
4. अ. 'वध'शब्दः, पु. च.वि. ए.व.
5. अ. 'वध्य'शब्दः, पु. ष.वि. ए.व.
6. अ. 'शर'शब्दः, पु. द्वि.वि. ए.व.
7. अ. 'शरण्य'शब्दः, पु. प्र.वि. ए.व.
8. अ. 'जाताभिषङ्ग'शब्दः, पु. प्र.वि. ए.व.
9. इ. 'नृपति'शब्दः, पु. प्र.वि. ए.व.
10. अ. 'निषङ्ग'शब्दः, पु. पं.वि. ए.व.
11. अव्ययम् (प्र) 'उद्धर्तुम्' (उत्-उपसर्गपूर्वकः 'धृ'धातुः, तुमुन्)
12. 'इष्'धातुः, प.प. भूतकालः (लङ्), प्र.पु. ए.व.
13. इ. 'प्रसभोद्धतारि'शब्दः, पु. प्र.वि. ए.व.

आ) समासः

१. मृगाणाम् इन्द्रः, तस्य - *षष्ठीतत्पुरुषः*
२. जातः अभिषङ्गः यस्य सः - *बहुव्रीहिः*
३. प्रसभेन उद्धताः - *तृ. तत्पुरुषः*
प्रसभोद्धताः अरयः येन सः - *बहुव्रीहिः*

६. संस्कृतसाहित्यपरिचयः
संस्कृतकवयित्र्यः

संस्कृतसाहित्यसमृद्धिं वर्धयितुं पुरुषाः यथा, तथैव महिलाः अपि प्रयत्नं कृतवत्यः । किन्तु यथा पुरुषाणां कृतिकाराणां नामानि महता प्रमाणेन संस्कृतक्षेत्रे दृश्यन्ते तथा स्त्रीणां नामानि न दृश्यन्ते इति तु सत्यम् एव । सामाजिकपरिस्थितेः कारणतः, विद्याभ्यासव्यवस्थायाः लोपस्य कारणतः वा स्त्रियः कृतिरचनासु अधिकतया प्रवृत्ताः न दृश्यन्ते । तथापि एतत् तु सत्यम् एव यत् कवयित्र्यः विदुष्यः च प्रतिभया पुरुषसमानाः एव आसन्, न तु न्यूनाः इति । अतः एव 'काव्यमीमांसा'नामकस्य ग्रन्थस्य कर्ता

राजशेखरः (क्रि.श. १०) वदति -

शीला-विद्या-मारुला-मोरिकाद्याः
काव्यं कर्तुं सन्ति विज्ञाः स्त्रियोऽपि ।। इति ।

ऋग्वेदादिषु 'ऋषिका', 'ब्रह्मवादिनी', 'मन्त्रद्रष्ट्री' इत्यादयः आसन् इति श्रूयते । घोषा, लोपामुद्रा, अपाला, लोमशा, विश्ववारा, सूर्या इत्यादयः मन्त्रद्रष्ट्रीषु अन्यतमाः । गार्गी, मैत्रैयी इत्यादीनां ब्रह्मवादिनीनां नामानि सर्वे जानन्ति एव । सूक्तिसङ्ग्रहेषु विविधैः कविभिः रचितेषु प्रशंसात्मकपद्येषु, शिलालेखेषु च विविधानां कवयित्रीणाम् उल्लेखः कृतः दृश्यते । पालीसाहित्ये 'थेरीगाथा'नामके सूक्तिसङ्ग्रहे विविधकवयित्रीभिः रचितानि मुक्तकानि उपलभ्यन्ते ।

गाथासप्तशतीग्रन्थस्य कानिचन सुभाषितानि कवयित्रीभिः एव रचितानि सन्ति । एवं कृतिरचनायां स्त्रीणां प्रवृत्तिः अधिकतया आसीत् इत्यत्र तु सन्देहः एव नास्ति ।

संस्कृतस्य एतत् दौर्भाग्यं यत् बह्व्यः कृतयः लुप्ताः सन्ति । केषाञ्चित् कवीनां कृतीनां च नामानि विविधेषु ग्रन्थेषु उल्लिखितानि दृश्यन्ते, किन्तु कृतयः तु न उपलभ्यन्ते । एतदेव मनसि निधाय नीलकण्ठदीक्षितः वदति -

'कति कवयः कति कृतयः
कति लुप्ताः कति चरन्ति कति शिथिलाः' इति ।

कवयित्रीणां विषये अपि एषः एव अंशः अन्वितः भवति । तन्नाम बह्वीनां कवयित्रीणां नामानि उल्लिखितानि दृश्यन्ते चेदपि कृतयः तु विरलतया एव उपलभ्यन्ते । यासां नामानि इदानीं न उपलभ्यन्ते तादृश्यः कवयित्र्यः अपि स्युः । काश्चन कृतयः तालपत्रेषु भूर्जपत्रेषु वा गुप्तरूपेण स्युः ।

इदानीं ४० कवयित्रीणां मुक्तकानि काव्यानि वा उपलभ्यन्ते । सुभद्रा, फल्गुहस्तिनी, मोरिका, पद्मावती, भावदेवी, इन्दुलेखा, शीलाभट्टारिका, विद्यावती इत्यादिभिः रचिताः श्लोकाः उपलभ्यन्ते । विजयाम्बिका, गङ्गादेवी, तिरुमलाम्बा, रामभद्राम्बा, देवकुमारिका, मधुरवाणी इत्यादीनां महाकाव्यानि उपलभ्यन्ते ।

कवयित्रीभिः कथं स्वबहुमुखप्रतिभा प्रदर्शिता इति द्रष्टुं वयं द्वित्रान् श्लोकान् परिशीलयाम -

'कृतघ्ने जनाः विश्वासं न कुर्वन्ति' इति भावं शीलाभट्टारिका एवं निरूपयति -

प्रियाविरहितस्यास्य हृदि चिन्ता समागता ।
इति मत्वा गता निद्रा के कृतघ्नमुपासते ॥

यदा प्रियायाः विरहः जातः तदा कस्यचित् हृदये चिन्ता आगता । 'यत्र प्रियया स्थातव्यम् आसीत् तत्र एषः चिन्तां स्थापितवान् । अतः 'एषः कृतघ्नः' इति चिन्तयित्वा निद्रा तस्य समीपं न गतवती एव । कृतघ्नस्य समीपं कोऽपि गन्तुं न इच्छति खलु ?

'मदालसा' नाम कवयित्री अस्मान् एवम् उपदिशति -

परलोकहितं तात प्रातरुत्थाय चिन्तय ।
इह ते कर्मणामेव विपाकश्चिन्तयिष्यति ॥

'एतस्मिन् लोके किं करणीयम् इति मा चिन्तयतु । पूर्वजन्मनः कर्मणाम् अनुगुणं फलं प्राप्यते । तदनुगुणं मानवजीवनं निर्मितं भवति । अतः प्रातः उत्थाय परलोकहितं किञ्चित् चिन्तयतु ।'

पतिप्रेम क्षीणतां गतम् इत्यतः उद्विग्नायाः कस्याश्चित् मानिन्याः अन्तरङ्गं भावदेवी एवं निरूपयति -

तथाऽभूदस्माकं प्रथममविभिन्ना तनुरियम्
ततो नु त्वं प्रेयानहमपि हताशा प्रियतमा ।
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरम्
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम् ॥

'प्रथमम् आवयोः देहः अभिन्नः आसीत् । (प्रीतिः गाढतमा आसीत् ।) ततः भवान् प्रियतमः जातः, अहं प्रिया जाता । (भवान्-अहम् इति भेदः आवयोः मध्ये उत्पन्नः ।) इदानीं भवान् मम स्वामी, अहं भवतः पत्नी अस्मि । (प्रीतिस्थाने स्वामि-सेवकभावः आगतः अस्ति ।) वज्रादपि कठिनानां प्राणानां फलम् इदानीं मया प्राप्तम् अस्ति ।'

परस्परानुरागः कालवशात् कथं क्षीणतां प्राप्नोत् इति बहु रमणीयतया वर्णितम् अस्ति अत्र कवयित्र्या । बहुभिः दाम्पत्यजीवने एतादृशः अनुभवः प्राप्तः स्यात् एव खलु ?

७. संस्कृतग्रन्थकारपरिचयः

कवयित्र्यः

विज्जिका – स्वतन्त्रकाव्यं रचितवतीषु कवयित्रीषु विज्जिकायाः अग्रस्थानम् अस्ति । 'विजयाम्बिका' इति एतस्याः अपरं नाम अपि आसीत् । विज्जिकायाः कालः कः आसीत् इति निश्चयरूपेण कथनं यद्यपि कष्टकरं, तथापि विद्वांसः एवं तर्कयन्ति यत् सा अष्टमे शतके आसीत् इति । कर्णाटकराज्यम् एतस्याः जन्मस्थलम् । 'कौमुदीमहोत्सव'नामकम् ऐतिहासिकं नाटकं रचितवती अस्ति एषा । २० तमस्य शतकस्य पूर्वार्धे केरलराज्ये एतत् नाटकं प्राप्तम् । एतया रचिताः रमणीयाः ३० श्लोकाः अपि उपलभ्यन्ते ।

तिरुमलाम्बा – १६ शतके जाता एषा विजयनगरराजस्य अच्युतदेवस्य पत्नी । 'वरदाम्बिकापरिणयः' नाम चम्पूग्रन्थः एतया लिखितः । ग्रन्थस्य अन्ते एषा स्वविषये उक्तवती अस्ति इत्यतः एतस्याः देशकालादिविषयाः स्फुटतया ज्ञायन्ते । वरदाम्बिकापरिणयः कश्चन ऐतिहासिकः ग्रन्थः । वरदाम्बा एतस्याः सपत्नी भवति । तथापि उदारहृदया एषा तां काव्यदृष्ट्या पश्यन्ती रमणीयतया वर्णितवती अस्ति । ललितपदरचना, वर्णनाचातुर्यम् इत्यादयः एतस्याः काव्यस्य वैशिष्ट्यम् ।

रामभद्राम्बा – १७ शतके एषा तञ्जावूरुनगरे जाता । राजा रघुनाथनामकः एतस्याः पतिः । 'रघुनाथाभ्युदय'नामकम् ऐतिहासिकं काव्यं रचितवती अस्ति एषा । पतिं श्रीरामस्य अवतारं मत्वा काव्यं रचितवती अस्ति । स्वस्य बहुभाषाप्रावीण्यं कविताप्रागल्भ्यं च स्वग्रन्थे साभिमानं वर्णितवती अस्ति एषा । रघुनाथाभ्युदयकाव्यं न केवलं काव्यदृष्ट्या, अपि तु ऐतिहासिकदृष्ट्या अपि विशेषमहत्त्वम् अर्हति । रघुनाथनायकस्य आस्थाने आशुकवितारचनासमर्थाः बह्व्यः कवयित्र्यः आसन् इति श्रूयते । तासु अन्यतमा 'मधुरवाणी' नाम कवयित्री रघुनाथनायकेन रचितं तेलुगुरामायणं संस्कृतेन अनूदितवती अस्ति ।

गङ्गादेवी – एषा विजयनगरस्थापकस्य बुक्करायस्य स्नुषा । कम्पणरायस्य पत्नी । 'वीरकम्पणरायचरितम्' इति काव्यं रचितवती अस्ति एषा ।

'मधुराविजयम्' इति तस्यैव काव्यस्य अपरं नाम । एतत् अपि ऐतिहासिकं काव्यम् । गङ्गादेवी चतुर्दशे (१४) शतके आसीत् । एतस्याः काव्यस्य भाषा सरला । एतस्याः कल्पनाः नूतनाः सन्दर्भोचिताः च भवन्ति । वर्णनानि न अतिदीर्घाणि, न नीरसानि वा । अतः एव प्रसिद्धेषु काव्येषु अन्यतमत्वेन परिगण्यते एतस्याः काव्यम् अपि ।

देवकुमारिका - एषा उदयपुरराजवंशीया, राज्ञः अमरसिंहस्य पत्नी च । एषा १७ शतके आसीत् । 'वैद्यनाथप्रासादप्रशस्तिः' इत्येतत् प्रशस्तिकाव्यं रचितवती अस्ति एषा ।

क्षमाराव् - एषा गतस्य शतकस्य पूर्वार्धे स्थिता श्रेष्ठा कवयित्री । महाराष्ट्रराज्ये जातायाः एतस्याः पिता शङ्करपण्डितः, माता उषा । वैद्यं राघवेन्द्रराव्वर्यं परिणीतवती एषा संस्कृतसाहित्यक्षेत्रे विशेषपरिश्रमं कृतवती अस्ति । एतस्याः १२ कृतयः मुद्रिताः सन्ति । तासु 'शङ्करजीवनाख्यानम्', 'तुकारामचरितम्', 'रामदासचरितम्', 'स्वराज्यविजयः' इत्यादीनि महा-काव्यानि । 'मीरालहरी' तया विरचितं खण्डकाव्यम् ।

'विचित्रपरिषद्यात्रा'नामके लघुपुस्तके अन्ते संस्कृतप्रचारविषये तया एवं प्रार्थ्यते -

संस्कृताधीतिनः सन्तु सर्वे भारतभूमिजाः ।
संस्कृतेनैव कुर्वन्तु व्यवहारं परस्परम् ॥
संस्कृतज्ञानमासाद्य संस्कृताचारवृत्तयः ।
सर्वतः संस्कृतीभूय सुखिनः सन्तु सर्वतः ॥

कोविदः - चतुर्थः पाठः

प्रश्नाः

१. *अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत ।*

१. सन्तः कानि घ्नन्ति ?
२. पितामहः ब्रह्मा कम् आशीर्वादं कृतवान् ?
३. देवाः किमर्थं दुःखिताः ?
४. 'गङ्गाप्रपातः' इत्यत्र विग्रहवाक्यं, समासनाम च लिखत ।
५. 'ऐच्छत्' इत्यत्र धातुः कः ?
६. एकस्याः संस्कृतकवयित्र्याः नाम लिखत ।

२. *णिजन्तप्रयोगं कृत्वा द्वितीयं वाक्यं पूरयत ।*

१. शिशवः फलं खादन्ति । माता फलं .... ।
२. सेवकः कर्तव्यं जानाति । स्वामी सेवकं कर्तव्यं .... ।
३. सर्वे चित्राणि पश्यन्ति । चित्रकारः सर्वान् चित्राणि .... ।
४. स्वर्णकारः आभरणं कृतवान् । शशिप्रभा स्वर्णकारेण आभरणं .... ।
५. प्रातः कमलं विकसिष्यति । प्रातः सूर्यः कमलं .... ।

३. *अधः दत्तानि विग्रहवाक्यानि उपयुज्य समस्तपदं समासनाम च लिखत ।*

१. ग्रीष्मश्च वसन्तश्च - ....
२. कृत्तिका च रोहिणी च - ....
३ गौश्च व्याघ्रश्च अनयोः समाहारः - ....
४. लोभश्च मोहश्च - ....
५. जरा च व्याधिश्च - ....
६. भीष्मश्च द्रोणश्च - ....

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 259) After completing the exercises check your answers.)

कोविदः - पञ्चमः पाठः

। अलक्ष्मीराविशत्येनं शयानमलसं नरम् । - *महाभारतम्*

Bad luck comes to the person who is always sleepy and lazy.

१. समासः

बहुव्रीहिसमासः (Bahuvrihi Compound)

Bahuvrihi is a compound in which the sense of the component words, is not predominant. But another word out side the compound, is predominant. A Bahuvrihi compound itself is an adjective to another word. Therefore the gender of a Bahuvrihi will be according to the noun which it qualifies.

Eg. - पीताम्बरः हरिः - Hari who wears (has) yellow garment.

The above compound is formed with the words पीत and अम्बर । पीत means yellow. अम्बर means garment. पीताम्बरः is the person who possesses (wears) yellow garment and he is Hari. Neither the sense of 'पीत' nor that of 'अम्बर' which constitute the compound here has prominence but the sense of the word 'हरि' which does not constitute the compound, has prominence. Thus 'पीताम्बर' is an adjective to 'हरि' ।

Bahuvrihi Compound is of many kinds. Some of them are mentioned below -

१. समानाधिकरणबहुव्रीहिः

Observe the following compound words -

१. प्रसन्नमुखः रामः - Rama who has a gracious countenance.
२. पीताम्बरः हरिः - Hari who has yellow garment.
३. कृतभोजनः बालः - A boy who has had his meal.
४. धृतपुष्पा बालिका - A girl who is wearing flowers.
५. पतितपर्णः वृक्षः - A tree from which the leaves have fallen.
६. निर्गतव्याघ्रं वनम् - A forest from where the tiger has gone.
७. वीरपुरुषः ग्रामः - A village wherein many brave people stay.

These compounds are dissolved as follows.

१. प्रसन्नं मुखं यस्य सः
२. पीतम् अम्बरं यस्य सः
३. कृतं भोजनं येन सः
४. धृतानि पुष्पाणि यया सा
५. पतितानि पर्णानि यस्मात् सः
६. निर्गतः व्याघ्रः यस्मात् सः
७. वीराः पुरुषाः यस्मिन् सः।

In the above sentences, the words that combine to form the compound are in the same case. Thus, if the two words in the same case are compounded to form Bahuvrihi, it is known by the name Samanadhikarana Bahuvrihi.

It is to be noted here that in the विग्रहवाक्य the forms of यद् and तद्शब्द change according to the desired meanings.

* यस्य सः – means 'he who has' * येन सः – 'he by whom'
* यया सा - 'she by whom' * यस्मात् सः – 'that (forest) from which' * यस्मिन् सः – 'that (village) in which'

Therefore while dissolving a बहुव्रीहिसमास you must carefully choose the proper form of यद् and तद् to use in the विग्रहवाक्य depending on the meaning of the given बहुव्रीहिसमास word.

२. **व्यधिकरणबहुव्रीहिः**

If two words ending in different case affixes are compounded to form Bahuvrihi it is called Vyadhikarana Bahuvrihi.

Eg.- शूलपाणिः - शूलं पाणौ यस्य सः (शिवः)
One who has a trident in hand.

गदापाणिः – गदा पाणौ यस्य सः (भीमः)
One who has a mace in hand.

शूलम् and गदा are in प्रथमाविभक्ति and पाणौ is in सप्तमी-विभक्तिः । Therefore these are instances of व्यधिकरणबहुव्रीहिः ।

३. नञ्बहुव्रीहिः

If in a Bahuvrihi compound, one of the words is the negative particle 'न' the compound is known as नञ् बहुव्रीहिः

Eg. - अधनः – न विद्यते धनं यस्य सः
One who does not have money.

अविद्यः – न विद्यते विद्या यस्य सः
One who has no education.

४. सहपूर्वपदबहुव्रीहिः

If in a Bahurvrihi compound 'सह' is the first word it is सहपूर्वपदबहुव्रीहिः ।

Eg - सलक्ष्मणः – लक्ष्मणेन सह वर्तते इति ।

One who is with Lakshmana.

In compounds, the word सह is changed to स

सपुत्रः – पुत्रेण सह वर्तते इति – A person who is with (his) son.

सहरिः – हरिणा सह वर्तते इति - A person who is with Hari.

Study the following sentences with बहुव्रीहिसमास words to understand them better.

१. विघ्नोपशान्तये **प्रसन्नवदनं** विष्णुं ध्यायेत् ।
To ward off impediments one must meditate on Vishnu who has a bright face.

२. रात्रौ रक्षकभटः **दण्डहस्तः** गृहं परितः भ्रमति ।
In the night, with a stick in hand the watchman goes around the house.

३. **गदापाणिः** विभीषणः चतुर्भिः राक्षसैः सह उत्पपात ।
With a mace in hand Vibhishana along with four other

demons, rose to the sky.

४. छात्राः **श्वेतवस्त्राः** शालां गच्छन्ति ।

Students wearing white clothes, go to school.

५. **अधनाः** धनं कामयन्ते ।

People without money long for it.

६. दशरथमहाराजः बहुकालम् **अपुत्रः** आसीत् ।

King Dasharatha was issueless for a long time.

७. **सलक्ष्मणः** **ससीतश्च** रामः वनं गतः ।

Accompanied by Lakshmana and Sita, Rama went to the forest.

८. **कुसुमहस्ताः** नर्तक्यः रङ्गं प्रविशन्ति ।

With flowers in their hands the dancers enter the stage.

९. उमेशः सर्वदा **समित्रः** भवति ।

Umesha is always with friends.

१०. हिमालयपर्वतः **उन्नतशिखरः** अस्ति ।

The Himalayan mountain has lofty peaks.

The compound words printed in bold in the above sentences, are dissolved as follows.

१. प्रसन्नं वदनं यस्य सः - प्रसन्नवदनः, तम् - प्रसन्नवदनम्

२. दण्डः हस्ते यस्य सः - दण्डहस्तः

३. गदा पाणौ यस्य सः - गदापाणिः

४. श्वेतानि वस्त्राणि येषां ते - श्वेतवस्त्राः

५. न विद्यते धनं येषां ते - अधनाः

६. न विद्यते पुत्रः यस्य सः - अपुत्रः

७. लक्ष्मणेन सह वर्तते इति - सलक्ष्मणः
   सीतया सह वर्तते इति - ससीतः

८. कुसुमानि हस्ते यासां ताः - कुसुमहस्ताः

९. मित्रैः सह वर्तते इति - समित्रः

१०. उन्नतानि शिखराणि यस्मिन् सः - उन्नतशिखरः

विशेषः

1. you know that in Bahuvrihi a word out side the compound, is predominant. Hence 'Bahuvrihi compound is always an adjective of another word. You also know that adjectives follow the gender and number of the noun they qualify.
   पीतम् अम्बरं यस्य सः - पीताम्बरः । Here the word अम्बरम् is in neuter, but the word पीताम्बरः is in masculine gender. (Because 'Hari', who wears yellow garment, is in masculine gender.)
   A few more examples are given below:
   * प्रसन्नं वदनं यस्य सः - प्रसन्नवदनः ।
     (The word 'वदनम्' is a neuter gender word. But the word प्रसन्नवदनः is in masculine gender.)
   * श्वेतं वस्त्रं यस्य सः - श्वेतवस्त्रः
     (The word 'वस्त्रम्' is a neuter gender word. But the word श्वेतवस्त्रः is in masculine gender.)
   * धृतं पुष्पं यया सा - धृतपुष्पा
     (The word 'पुष्पम्' is a neuter gender word. But the word धृतपुष्पा is in feminine gender.)
   * लिखितं चित्रं यया सा - लिखितचित्रा
     (The word 'चित्रम्' is a neuter gender word. But the word लिखितचित्रा is in feminine gender.)
   * बहवः जनाः यस्मिन् तत् - बहुजनम् (गृहम्)
     ('जनः'is a masculine gender word. But the word बहुजनम् is in neuter gender.)
2. while dossolving a बहुव्रीहि the वचन of the compound words must be determined from the meaning of the compound word.
   Eg - प्रसन्नं वदनं यस्य सः - प्रसन्नवदनः
   An individual has only one face. Hence वदन is singular.

विशाले नेत्रे यस्याः सा - विशालनेत्रा
An individual has two eyes. Hence there is dual here.

श्वेताः केशाः यस्य सः - श्वेतकेशः
An individual has lot of hair. Hence there is plural here.

Thus in the विग्रहवाक्यम् of बहुव्रीहि the वचनम् of the indiviual words is according to the meaning of the compound word.

२. विशेषविषयाः

सन्प्रत्ययः (इच्छार्थकः)

१. सः भगवद्गीतां **पिपठिषति** - He wants to read the Bhagavadgita.

२. अयं नगरं **जिगमिषति** - This man likes to go to the city.

The phrases 'wants to read' and 'likes to go' can be expressed in Samskrit by one word as 'पिपठिषति' and 'जिगमिषति' - These words are known as (सन्नन्त) or desideratives. The above examples are verbs. In the sense of 'dcsircs to do an action', 'सन्' is affixed to verb roots.

Eg.- पठ् + सन् - पिपठिषति
गम् + सन् - जिगमिषति

Not only verbs but also participles (कृदन्तानि) can be formed with सन् affix.

१. पिपठिषति (पठितुम् इच्छति) - likes to read - verb.
२. पिपठिषा (पठितुम् इच्छा) - the desire to read - Participles
३. पिपठिषुः (पठितुम् इच्छुः) - one who desires to read - Participles

Given below are sentences with desiderative participles. -

रामस्य पिपठिषा अस्ति - Rama has the desire to read.

रामः पिपठिषुः - Rama is desirous of reading.

Some rarely used Kridanta forms ending in सन् affixes are not given here.

Study the examples of desideratives printed in bold in the following sentences -

१. सः भगवद्गीतां **पिपठिषति** ।
He desires to read the Bhagavadgita.

२. त्वम् इदं कार्यं **चिकीर्षसि** किम् ?
Do you want to do this work ?

३. अहं मैसूरुनगरं **जिगमिषुः** अस्मि ।
I am desirous of going to Mysore.

४. **मुमुक्षवः** सर्वे आदौ उपनिषदः, गीतां, ब्रह्मसूत्राणि च **पिपठिषन्ति** ।
Those desirous of salvation want to read the Upanishads, Gita and Brahmasutras to start with.

५. अलसोऽयं सदा **सुषुप्सति,** उत्थितश्चेत् **बुभुक्षते** ।
This lazy person wants to sleep always, and when awake wants to eat.

६. अहम् उपाहारमन्दिरं **जिगमिषुः,** क्षीरं **पिपासुश्च** ।
I am desirous of going to the restaurant and (desirous of) drinking milk.

७. सः बाहुभ्यामेव नदीं **तितीर्षति** ।
He wants to cross the river with his arms only (by swimming).

८. विज्ञानस्य **जिज्ञासा** बहूनामस्ति, किन्तु धर्मस्य **जिज्ञासा** केषाञ्चिदेव अस्ति ।
Many have a desire to know Science, but only a few have the desire to know Dharma.

९. अध्ययनानन्तरं न्यायवादी **बुभूषुः** अस्मि ।
After my studies, I am desirous of becoming an advocate.

१०. ममापि अस्मिन् विषये किञ्चित् **विवक्षा** अस्ति ।
I too have a desire to say something in this matter.

Bold words in the above sentences, are examples of desideratives (सन्नन्त). They are dissolved as follows.

१. पिपठिषति - पठितुम् इच्छति
२. चिकीर्षति - कर्तुम् इच्छति
३. जिगमिषुः - गन्तुम् इच्छुः
४. मुमुक्षवः - मोक्तुम् इच्छवः
पिपठिषन्ति - पठितुम् इच्छन्ति
५. सुषुप्सति - स्वप्तुम् इच्छति
बुभुक्षते - भोक्तुम् इच्छति
६. जिगमिषुः - गन्तुम् इच्छुः, पिपासुः - पातुम् इच्छुः
७. तितीर्षति - तरीतुम् इच्छति
८. जिज्ञासा - ज्ञातुम् इच्छा

अभ्यासः

I. *अधोलिखितानि विग्रहवाक्यानि सम्यक् परिशील्य समस्तपदं बहुव्रीहि-समासप्रभेदस्य नाम च लिखत ।*

उदा - महत् बलं यस्य सः (पुरुषः) महाबलः - समानाधिकरणबहुव्रीहिः

१. उन्नतानि शिखराणि यस्मिन् सः (गिरिः) ....
२. दण्डः हस्ते यस्य सः (पुरुषः) ....
३. कुसुमानि हस्ते येषां ते (पुरुषाः) ....
४. न विद्यते बलं यस्याः सा (स्त्री) ....
५. न विद्यते वस्त्रं यस्य सः (पुरुषः) ....
६. हरिणा सह वर्तते इति (केशवः) ....
७. मित्रैः सह वर्तते इति (उमेशः) ....
८. शङ्खः पाणौ यस्य सः (मुकुन्दः) ....
९. रिक्तौ हस्तौ यस्य सः (भिक्षुकः) ....
१०. चापः हस्ते यस्य सः (योद्धा) ....
११. चक्रं पाणौ यस्य सः (विष्णुः) ....
१२. भार्यया सह वर्तते इति (पुरुषः) ....
१३. शस्त्रेण सहितः (वीरः) ....
१४. विद्या धनं येषां ते (पण्डिताः) ....

१५. चन्द्रः मौलौ यस्य सः (रुद्रः) ....
१६. निर्मलं हृदयं यस्य सः (सज्जनः) ....
१७. कृशानि अङ्गानि यस्य सः (पुरुषः) ....
१८. परिवारेण सह वर्तते इति (राज्ञी) ....

II. *अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखित्वा बहुव्रीहिसमास-प्रभेदं निर्दिशत ।*

उदा - सदारः - दारैः सह वर्तते इति - सहपूर्वपदबहुव्रीहिः

	समस्तपदम्	*विग्रहवाक्यम्*	*प्रभेदस्य नाम*
१.	रक्तवस्त्रः (पुरुषः)	-------	-------
२.	चर्माम्बरः (शिवः)	-------	-------
३.	कोमलाङ्गः (शिशुः)	-------	-------
४.	श्वेताम्बराः (संन्यासिन्यः)	-------	-------
५.	यशोधनः (राजा)	-------	-------
६.	विषकण्ठः (शङ्करः)	-------	-------
७.	फालनेत्रः (शम्भुः)	-------	-------
८.	अनिद्रः (पुरुषः)	-------	-------
९.	सकुटुम्बः (गृहस्थः)	-------	-------
१०.	सधनाः (वैश्याः)	-------	-------
११.	मोदकहस्तः (गणेशः)	-------	-------
१२.	स्थूलशरीरः (पुरुषः)	-------	-------

III. *उदाहरणानुसारं रिक्तस्थानं पूरयत ।*

उदा - पिपठिषुः - पठितुम् इच्छुः ; पिपठिषति - पठितुम् इच्छति

१. जिगमिषुः - गन्तुम् इच्छुः ; जिगमिषति - ....
२. चिकीर्षुः - कर्तुम् इच्छुः ; चिकीर्षति - ....
३. दित्सुः - दातुम् इच्छुः ; दित्सति - ....
४. विजिगीषुः - विजेतुम् इच्छुः ; विजिगीषति - ....
५. जिघांसवः - हन्तुम् इच्छवः ; जिघांसन्ति - ....
६. ईप्सवः - आप्तुम् इच्छवः ; ईप्सन्ति - ....

७. विवक्षवः - वक्तुम् इच्छवः ; विवक्षन्ति - ....
८. बुभूषवः - भवितुम् इच्छवः ; बुभूषन्ति - ....

IV. *उदाहरणानुगुणं सन्नन्तरूपस्य अर्थं विवृणुत ।*

उदा - विवक्षा - वक्तुम् इच्छा

१. जिगमिषा - ....
२. तितीर्षा - ....
३. शुश्रूषा - ....
४. बुभूषा - ....
५. चिकीर्षा - ....
६. जिज्ञासा - ....
७. जिगीषा - ....
८. दिदृक्षा - ....
९. पिपासा - ....
१०. मुमुक्षा - ....

V. *उदाहरणानुसारं द्वितीयं तृतीयं च पदं लिखत ।*

उदा - कर्तुम् इच्छति - चिकीर्षति - चिकीर्षा, चिकीर्षुः

१. ग्रहीतुम् इच्छति - जिघृक्षति ...., ...
२. अत्तुम् इच्छति - जिघत्सति ...., ...
३. जेतुम् इच्छति - जिगीषति ...., ...
४. प्रष्टुम् इच्छति - पिपृच्छिषति ...., ...
५. तरीतुम् इच्छति - तितीर्षति ...., ...
६. आप्तुम् इच्छति - ईप्सति ...., ...
७. लेखितुम् इच्छति - लिलिखिषति ...., ...
८. हन्तुम् इच्छति - जिघांसति ...., ...
९. पठितुम् इच्छति - पिपठिषति ...., ...
१०. रक्षितुम् इच्छति - रिरक्षिषति ...., ...

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 260) After completing the exercises check your answers.)

३. सुभाषितानि

१. यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पुराकृतं कर्म कर्तारमनुगच्छति ।।

पदविभागः -

यथा, धेनुसहस्रेषु, वत्सः, विन्दति, मातरम्, तथा, पुराकृतम्, कर्म, कर्तारम्, अनुगच्छति ।

अन्वयः -

यथा वत्सः धेनुसहस्रेषु मातरं विन्दति तथा पुराकृतं कर्म कर्तारम् अनुगच्छति ।

अन्वयार्थः -

यथा, वत्सः = धेनोः पुत्रः, धेनुसहस्रेषु = गवां सहस्रेषु, मातरं = जननीम्, विन्दति = प्राप्नोति, तथा, पुराकृतं = पूर्वस्मिन् जन्मनि कृतम्, कर्म, कर्तारम् = यः कार्यं करोति तम्, अनुगच्छति = अनुसरति ।

तात्पर्यम्–

सहस्राधिकाः धेनवः सन्ति चेत् अपि वत्सः तासु धेनुषु स्वमातुः एव समीपं गत्वा तामेव अनुसरति । तथा एव अस्माभिः पूर्वजन्मनि कृतानि कर्माणि अस्मान् अनुसरन्ति एव ।

२. मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।।

पदविभागः -

मनसि, वचसि, काये, पुण्यपीयूषपूर्णाः, त्रिभुवनम्, उपकारश्रेणिभिः, प्रीणयन्तः, परगुणपरमाणून्, पर्वतीकृत्य, नित्यम्, निजहृदि, विकसन्तः, सन्ति, सन्तः, कियन्तः ।

अन्वयः–

मनसि वचसि काये (च) पुण्यपीयूषपूर्णाः, त्रिभुवनम् उपकारश्रेणिभिः

प्रीणयन्तः, परगुणपरमाणून् नित्यं पर्वतीकृत्य निजहृदि विकसन्तः सन्तः कियन्तः सन्ति ?

अन्वयार्थः -

मनसि = चेतसि, वचसि = वचने, काये = शरीरे, पुण्यपीयूषपूर्णाः = पुण्यरूपेण अमृतेन परिपूर्णाः, त्रिभुवनम् = त्रीणि भुवनानि अपि, उपकारश्रेणिभिः = उपकाराणां समूहैः, प्रीणयन्तः = सन्तोषयन्तः, परगुणपरमाणून् = अन्येषु स्थितान् अल्पगुणान् अपि, पर्वतीकृत्य = पर्वतसदृशान् कृत्वा, निजहृदि = स्वस्य मनसि, विकसन्तः = सन्तोषं प्राप्नुवन्तः, सन्तः = सत्पुरुषाः, कियन्तः = कतिसङ्ख्याकाः, सन्ति ?

तात्पर्यम्-

सज्जनानां स्वभावं वर्णयति कविः । सत्पुरुषाणां वचांसि मनांसि शरीराणि च अमृतेन पूर्णानि भवन्ति । तादृशेन अमृतपूर्णेन वचनेन, चेतसा, शरीरेण च ते सज्जनाः उपकारसहस्त्रेण लोके स्थितानां सर्वेषां जीविनामपि हितम् आचरन्ति । अपि च अन्येषु स्थिताः गुणाः अल्पाः चेदपि तान् एव बहु मत्वा, मनसि सन्तोषम् अनुभवन्ति । किन्तु एतादृशाः जनाः जगति कियन्तः सन्ति ?

४. काव्यकथा

यदा कुमारः जातः तदा तं गङ्गा परिपालितवती । तदा ईश्वरः पार्वत्या सह आकाशमार्गे विहारं कुर्वन् तत्र आगतः । तौ द्वौ अपि शिशुं दृष्टवन्तौ ।

ईश्वरः पार्वत्यै शिशोः जन्मवृत्तान्तम् अकथयत् । तदा सन्तुष्टा पार्वती प्रीत्या तं शिशुं गृहीत्वा शिवेन सह कैलासम् अगच्छत् । तत्र कुमारस्य जन्मोत्सवः समाचरितः[1] । उत्सवेन इन्द्रादयः देवाः ऋषयः च सर्वे आनन्दिताः । कुमारस्य बालक्रीडाः सर्वान् आनन्दयन्ति स्म । कुमारः बाल्ये एव अतीव शौर्यवान् आसीत् ।

कुमारस्य बाललीलाः शौर्यवार्तां च श्रुत्वा तारकासुरपीडिताः इन्द्रादयः कैलासम् आगताः । तत्र ते ईश्वरस्य पार्श्वे स्थितं, शूरं, तेजस्विनम्, आयुधधारिणं कुमारम् अवलोकितवन्तः । इन्द्रस्य तु महान् आनन्दः

---

1. was celebrated

समुत्पन्नः । तस्य मनसि जयस्य आशा सञ्जाता । ततः इन्द्रः हरस्य पुरतः तारकासुरस्य उपद्रवान्[2] वर्णयित्वा – 'तारकवधार्थं कुमारं प्रेषयतु' इति प्रार्थितवान् । तदा ईश्वरः – 'इन्द्रादीनां साहाय्यार्थं गच्छतु' इति कुमारम् आदिष्टवान् । पार्वती अपि हर्षेण आशीर्वादपूर्वकं तं कैलासात् प्रेषितवती । इन्द्रादयः देवाः कुमारम् अनुसृतवन्तः । सर्वे स्वर्गं प्राविशन् । तत्र गन्धर्वादयः नारदादयः च प्रशंसावचनैः कुमारस्य स्वागतम् अकुर्वन् ।

अनन्तरं तारकवधाय युद्धं करणीयम् इति निश्चितम् । सैन्यानां सज्जीकरणं समारब्धम् । कुमारः सेनाधिपतिः इति अभिषिक्तः । ततः सेनासहिताः सर्वे इन्द्रादयः तारकासुराभिमुखं प्रस्थिताः । कुमारः सेनायाः नायकः आसीत् । एते युद्धार्थम् आगच्छन्ति इति गुप्तचरैः ज्ञात्वा तारकः अपि युद्धसन्नाहं कृतवान् । युद्धप्रस्थानसमये तेन बहवः उत्पाताः[3] दृष्टाः । अपशकुनानि दृष्टानि । तथापि कुपितः तारकः असुरैः सह युद्धाय आगतः । सुरासुरयोः मध्ये घोरं युद्धं प्रवृत्तम् । शूरः कुमारः तारकासुरं मारितवान् । समस्तः अपि लोकः सन्तोषम् अन्वभवत् । पुनः अपि इन्द्रः स्वर्गाधिपत्यं प्राप्तवान् । सर्वत्र मङ्गलम् अभवत् ।

प्रश्नाः

१. जातस्य कुमारस्य पालनं का कृतवती ?
२. तारकासुरपीडिताः इन्द्रादयः शिवस्य पार्श्वे कीदृशं कुमारं दृष्टवन्तः ?
३. इन्द्रः शिवं किं प्रार्थितवान् ?
४. युद्धे निश्चिते कुमारः कस्मिन् पदे अभिषिक्तः ?
५. युद्धे तारकासुरं कः मारितवान् ?

५. श्लोकेषु अन्वयक्रमः

यदा दिलीपः सिंहं मारयितुं प्रयत्नं कृतवान् तदा तस्य करः निषङ्गे एव संलग्नोऽभवत् । किमपि कर्तुम् अशक्तः राजा बहु कुपितः अभवत् । तदा सिंहः दिलीपं कथयति –

---

2. trouble, 3. Calamities like the sight of stars during the day etc.

५. तमार्यगृह्यं निगृहीतधेनुः मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन् विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥

पदविभागः

तम्[1], आर्यगृह्यम्[2], निगृहीतधेनुः[3], मनुष्यवाचा[4], मनुवंशकेतुम्[5], विस्माययन्[6], विस्मितम्[7], आत्मवृत्तौ[8], सिंहोरुसत्त्वम्[9], निजगाद[10], सिंहः[11] ।

अन्वयः

निगृहीतधेनुः सिंहः आर्यगृह्यं, मनुवंशकेतुं, सिंहोरुसत्त्वम्, आत्मवृत्तौ विस्मितं तं मनुष्यवाचा विस्माययन् निजगाद ।

प्रतिपदार्थः

सिंहः - The lion, निगृहीतधेनुः - which had seized the cow, निजगाद - spoke, मनुष्यवाचा - in the language of humans, तम् - to him (Dilipa), विस्माययन् - causing him to be (even more) surprised, आर्यगृह्यम् - (him) who was on the side of noble men, मनुवंशकेतुम् - who was like an ornament to the lineage of Manu, सिंहोरुसत्त्वम् - who had the strength of a lion, विस्मितम् - (and) who was surprised, आत्मवृत्तौ - at his own present state.
[He was surprised by the fact that he was not able to take out an arrow from the quiver and shoot it, and now the lion speaking like a human being surprised him even more]

तात्पर्यम्

यदा दिलीपस्य बाहुः स्तब्धः अभवत् तदा सः बहु विस्मितः । तस्मिन् एव समये सिंहः मनुष्यवचनेन दिलीपम् उद्दिश्य अकथयत् । सिंहः मनुष्यवाचा यत् अवदत् तत् श्रुत्वा राजा नितराम् आश्चर्यचकितः अभवत् ।

अन्वयरचना

निजगाद - अकथयत् - *क्रियापदम्*
कः निजगाद ? - सिंहः - *कर्तृपदम्*
कीदृशः सिंहः ? - निगृहीतधेनुः

पुनः कीदृशः ? - विस्माययन्
कया विस्माययन् ? - मनुष्यवाचा
कं विस्माययन् ? - तम्
कीदृशं तम् ? - सिंहोरुसत्त्वम्
पुनः कीदृशम् ? - मनुवंशकेतुम्
पुनः कीदृशम् ? - आर्यगृह्यम्
पुनः कीदृशम् ? - विस्मितम्
कुत्र विस्मितम् ? - आत्मवृत्तौ

विशेषः

अ) पदविवरणम्

1. द. 'तद्'शब्दः, पु. द्वि.वि. ए.व.
2. अ. 'आर्यगृह्य'शब्दः, पु. द्वि.वि. ए.व.
3. उ. 'निगृहीतधेनु'शब्दः, पु. प्र.वि. ए.व.
4. च. 'मनुष्यवाच्'शब्दः, स्त्री. तृ.वि. ए.व.
5. उ. 'मनुवंशकेतु'शब्दः, पु. द्वि.वि. ए.व.
6. त. 'विस्माययत्'शब्दः, पु. प्र.वि. ए.व.
7. अ. 'विस्मित'शब्दः, पु. द्वि.वि. ए.व.
8. इ. 'आत्मवृत्ति'शब्दः, स्त्री. स.वि. ए.व.
9. अ. 'सिंहोरुसत्त्व'शब्दः, पु. द्वि.वि. ए.व.
10. 'नि'-उपसर्गपूर्वकः 'गद्'धातुः प.प. भूत(लिट्), प्र.पु. ए.व.
11. अ. 'सिंह'शब्दः पु. प्र.वि. ए.व.

आ) समासः

१. आर्याणां गृह्यः, तम् - *षष्ठीतत्पुरुषः*
२. निगृहीता धेनुः येन सः - तम् - *बहुव्रीहिः*
३. मनुष्याणां वाक्, तया - *षष्ठीतत्पुरुषः*
४. मनोः वंशः - तस्य केतुः, तम् - *षष्ठीतत्पुरुषः*
५. आत्मनः वृत्तिः, तस्याम् - *षष्ठीतत्पुरुषः*
६. सिंहः इव उरुसत्त्वः, तम् - *कर्मधारयः*

१. कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥

पदविभागः

कैलासगौरम्[1], वृषम्[2], आरुरुक्षोः[3], पादार्पणानुग्रहपूतपृष्ठम्[4], अवेहि[5], माम्[6], किङ्करम्[7], अष्टमूर्तेः[8], कुम्भोदरम्[9], नाम[10], निकुम्भमित्रम्[11] ॥

अन्वयः

कैलासगौरं वृषम् आरुरुक्षोः अष्टमूर्तेः पादार्पणानुग्रहपूतपृष्टं निकुम्भ-मित्रं मां कुम्भोदरं नाम किङ्करम् अवेहि ।

प्रतिपदार्थः

अवेहि - know, माम् - me, कुम्भोदरं नाम किङ्करम् - to be a servant named Kumbhodara, अष्टमूर्तेः - of Shiva who has eight forms (and), निकुम्भमित्रम् - a friend of Nikumbha (another servant of Shiva), पादार्पणानुग्रहपूतपृष्ठम् - whose back has been sanctified by the placing of the foot of Shiva, आरुरुक्षोः - when he climbs, वृषम् - the bull, कैलासगौरम् - that is as white as mount Kailasa.

तात्पर्यम्

सिंहः कथयति - ''अहं न सामान्यसिंहः । मम नाम कुम्भोदरः । अहं शिवकिङ्करस्य निकुम्भस्य मित्रम् । यदा ईश्वरः वृषभवाहनम् आरोढुम् इच्छति, तदा मम पृष्ठस्योपरि पादं निक्षिप्य ततः आरोहति । एवं मम पृष्ठं पवित्रम् । अहं शिवस्य किङ्करः अस्मि'' इति ।

अन्वयरचना

अवेहि - जानीहि - *क्रियापदम्*
कः ? - (त्वम्) - *कर्तृपदम्*
कम् अवेहि ? - माम् - *कर्मपदम्*
कीदृशं माम् ? - निकुम्भमित्रम्
पुनः कीदृशम् ? - कुम्भोदरं नाम

पुनः कीदृशम् ? - किङ्करम्
कस्य किङ्करम् ? - अष्टमूर्तेः
कीदृशस्य अष्टमूर्तेः ? - आरुरुक्षोः
कम् आरुरुक्षोः ? - वृषम्
कीदृशं वृषम् ? - कैलासगौरम्
पुनः कीदृशम् ? - पादार्पणानुग्रहपूतपृष्ठम्

विशेषः

अ) पदविवरणम् -

1. अ. 'कैलासगौर'शब्दः पु. द्वि.वि. ए.व.
2. अ. 'वृष'शब्दः, पु. द्वि.वि. ए.व.
3. उ. 'आरुरुक्षु'शब्दः, पु. ष.वि. ए.व.
4. अ. 'पादा......पृष्ठ'शब्दः, पु. द्वि.वि. ए.व.
5. 'अव'-उपसर्गपूर्वकः 'इण्'धातुः प.प. प्रेरणा(लोट्), म.पु. ए.व.
6. द. 'अस्मद्'शब्दः त्रि. द्वि.वि. ए.व.
7. अ. 'किङ्कर'शब्दः, पु. द्वि.वि. ए.व.
8. इ. 'अष्टमूर्ति'शब्दः, पु. ष.वि. ए.व.
9. अ. 'कुम्भोदर'शब्दः, पु. द्वि.वि. ए.व.
10. अव्ययम् 'नाम'
11. अ. 'निकुम्भमित्र'शब्दः, पु. द्वि.वि. ए.व.

आ) समासः -

१. कैलासः इव गौरः, तम् - *कर्मधारयः*
२. पादयोः अर्पणम्, पादार्पणम् - *ष.तत्पुरुषः*
   पादार्पणम् एव अनुग्रहः - *कर्मधारयः*
   पादार्पणानुग्रहेण पूतं पृष्ठं यस्य सः, तम् - *बहुव्रीहिः*
३. अष्ट मूर्तयः यस्य सः, तस्य - *बहुव्रीहिः*
४. निकुम्भः मित्रं यस्य सः, तम् - *बहुव्रीहिः*

६. संस्कृतसाहित्यपरिचयः

चम्पूग्रन्थाः

दृश्यं श्रव्यं चेति काव्यं द्विधा विभक्तम् । तत्र श्रव्यकाव्येषु अन्यतमम् अस्ति चम्पूकाव्यम् । गद्यपद्यसम्मिश्रः काव्यप्रकारः 'चम्पूः' इति उच्यते । कविः दण्डी चम्पूलक्षणम् एवं निरूपयति - *'गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते'* इति । प्राचीने काले अपि चम्पूग्रन्थाः आसन् एव । यतः अन्येषु ग्रन्थेषु तेषाम् उल्लेखः दृश्यते । किन्तु इदानीम् उपलभ्यमानेषु चम्पूग्रन्थेषु प्रथमा नाम 'नलचम्पूः' । एषः ग्रन्थः दशमे शतके स्थितेन त्रिविक्रमभट्टेन रचितः ।

गद्यपद्यसम्मिश्ररचना ब्राह्मणग्रन्थेषु एव दृश्यते । ऐतरेयब्राह्मणस्य हरिश्चन्द्रोपाख्यानम् एतस्य प्रमुखम् उदाहरणम् । उपनिषद्ग्रन्थेषु अपि मिश्ररचनाः दृश्यन्ते एव । महाभारते, विष्णुपुराणे, भागवते च विरलतया मिश्ररचनाः दृश्यन्ते । शिलालेखेषु अपि एषा मिश्रशैली एव दृश्यते ।

पञ्चतन्त्रं, हितोपदेशः, शुकसप्ततिः इत्यादिषु ग्रन्थेषु अपि मिश्रशैली एव प्राधान्येन दृश्यते । कालिदासभासादीनां नाटकेषु अपि मिश्रशैली अस्ति एव । एवम् एतेषु सर्वेषु अपि दृश्यमाना मिश्रशैली एव चम्पूरूपं प्राप्तवती ।

'केवलगद्यस्य केवलपद्यस्य च अपेक्षया अपि मिश्रशैली एव आकर्षिका' इति चिन्तनं चम्पूरचनायाः प्रेरकम् अस्ति । यथा सङ्गीतसहितं पद्यम् आकर्षकं, यथा च द्राक्षामधुनोः मेलनं रुचिकरं, तथैव गद्यपद्यसम्मिश्रणम् अपि ।

पद्यकाव्ये एकस्मिन् सर्गे एकम् एव छन्दः उपयोक्तव्यम् । किन्तु चम्पूकाव्ये तथा नियमः न भवति । यत्र कुत्रापि यत्किमपि छन्दः उपयोक्तुं शक्यते । पूर्वापरसम्बन्धस्य योजनार्थं गद्यस्य उपयोगः कर्तुं शक्यते । एवं सौलभ्यं चम्पूकाव्येषु अधिकम् । यः गद्ये पद्ये च स्वसामर्थ्यं प्रदर्शयितुम् इच्छति तस्मै अपि चम्पूकाव्यम् उत्तमं क्षेत्रम् । अतः एव बहवः कवयः चम्पूग्रन्थान् अधिकतया लिखितवन्तः ।

पद्यकाव्येषु अन्तर्विभागस्य 'सर्गः' इति नाम यथा निश्चितं, तथा चम्पूग्रन्थे नास्ति । कवयः यत् स्वस्मै रोचते तत् नाम निर्दिशन्ति । स्तबकम्, उच्छ्वासः, आश्वासः, विलासः, तरङ्गः, सर्गः, लम्बकः, कल्लोलः इत्यादीनि नामानि चम्पूग्रन्थेषु दृश्यन्ते ।

वर्णनीयविषयम् अवलम्ब्य चम्पूग्रन्थाः चतुर्धा विभक्तुं शक्याः । ते च विभागाः -

१. पौराणिककथाम् ऐतिहासिककथां वा अवलम्ब्य रचिताः ।
   यथा - नलचम्पूः, वरदाम्बिकापरिणयः इत्यादयः ।
२. काल्पनिककथाम् अवलम्ब्य रचिताः ।
   यथा - विक्रमसेनचम्पूः, उदयसुन्दरीकथा इत्यादयः ।
३. तीर्थक्षेत्रादिवर्णनार्थं प्रवृत्ताः ।
   यथा - विश्वगुणादर्शचम्पूः, यात्राप्रबन्धः इत्यादयः ।
४. दार्शनिकविचारं प्रधानीकृत्य प्रवृत्ताः ।
   यथा - तत्त्वगुणादर्शः, विद्वन्मोदतरङ्गिणी इत्यादयः ।

संस्कृतक्षेत्रे एतावता २८५ चम्पूकाव्यानि रचितानि सन्ति इति साधारं ज्ञायते । किन्तु तेषु प्रकाशिताः ७४. रामायणं, महाभारतं, भागवतं, जैनपुराणानि, शैवपुराणानि च चम्पूग्रन्थानां मूलस्त्रोतांसि । आश्रयदातॄणां राज्ञां चरित्रस्य चित्रणार्थम् अपि बहूनि चम्पूकाव्यानि रचितानि दृश्यन्ते ।

चम्पूग्रन्थानाम् अन्यत् एकं वैशिष्ट्यं नाम - दक्षिणभारतीयैः एव एते ग्रन्थाः अधिकतया रचिताः । अत्र कारणम् एवं स्यात् इति तर्कयन्ति पण्डिताः - ''चम्पूग्रन्थाः दशमशतकस्य अनन्तरं जनप्रियाः जाताः । तत्समये उत्तरभारते यवनादीनाम् आक्रमणं विशेषतः दृश्यते स्म । अतः राजकीयस्थिरता, सामाजिकशान्तिः इत्यादयः तत्र अधिकतया न आसन् । यत्र शान्तिः न भवति तत्र ग्रन्थरचनादिकं न्यूनतया एव प्रचलति । यदा उत्तरभारते एतादृशी स्थितिः आसीत् तदा दक्षिणभारते शान्तिः दृश्यते स्म । चक्रवर्तिनः सामन्तराजाः च कवीनां प्रोत्साहकाः आसन् । अतः चम्पूग्रन्थाः अधिकतया दक्षिणभारतीयैः एव रचिताः'' इति ।

चम्पूग्रन्थेषु नलचम्पूः (त्रिविक्रमभट्टरचिता), यशस्तिलकचम्पूः (सोमेश्वर-सूरिरचिता), चम्पूरामायणम् (भोजदेवविरचितम्), चम्पूभारतम् (अनन्त-भट्टविरचितम्), नीलकण्ठविजयचम्पूः (नीलकण्ठदीक्षितविरचिता), विश्व-गुणादर्शचम्पूः (वेङ्कटाध्वरिरचिता), वरदाम्बिकापरिणयचम्पूः (तिरुमलाम्बया रचिता) इत्यादयः प्रसिद्धाः सन्ति ।

७. संस्कृतग्रन्थकाराः

चम्पूकाराः

भोजदेवः - भोजदेवेन 'चम्पूरामायणं' नाम सुप्रसिद्धं चम्पूकाव्यं लिखितम् ।

एषः मालवाधिपतिः । (विदर्भदेशस्य राजा इति केचन वदन्ति ।) धारानगरं मालवदेशस्य राजधानी । ऐतिहासिकप्रमाणैः ज्ञायते यत् भोजदेवः एकादशे शतके (क्रि. श. १०१९-१०६३) आसीत् इति । भोजः स्वयं कविः आसीत्, बहूनां पण्डितानाम् आश्रयदाता अपि आसीत् । एतेन सरस्वती-कण्ठाभरणम्, शृङ्गारप्रकाशः, शब्दानुशासनम् इत्यादयः अपि रचिताः सन्ति ।

चम्पूरामायणे बालकाण्डतः युद्धकाण्डपर्यन्ता कथा पञ्चसु काण्डेषु निरूपिता अस्ति । रामायणस्य एव कथा अस्ति अस्मिन् ग्रन्थे । ललितमनोहरशैली, कोमलः पदविन्यासः, सुन्दराः अलङ्काराः, हृदयहारि भावाविष्करणम् इत्यादीनि एतस्य ग्रन्थस्य वैशिष्ट्यानि । चम्पूरामायणस्य बहूनि व्याख्यानानि उपलभ्यन्ते ।

अनन्तभट्टः - एषः 'चम्पूभारतम्' इति ग्रन्थं रचितवान् । ग्रन्थस्य नाम एव कथयति यत् एषः ग्रन्थः महाभारतस्य कथायाः आधारेण रचितः इति । अत्र १२ स्तबकानि सन्ति । अनन्तभट्टस्य देशकालादिविषये अधिकं विवरणं न लभ्यते । षोडशशतकस्य आदिभागे एषः आसीत् इतिं पण्डितैः ऊह्यते ।

चम्पूभारतस्य शैली किञ्चित् प्रौढा । ये व्युत्पत्तिम् इच्छन्ति ते यथा चम्पूरामायणं तथैव चम्पूभारतम् अपि पठन्ति । किन्तु चम्पूरामायणे यावत् माधुर्यं दृश्यते तावत् माधुर्यं चम्पूभारते न दृश्यते । विचित्रकल्पनायां, शब्द-चमत्कारे च कवेः विशेषासक्तिः । आरम्भस्तबकेषु काव्यगुणाः अधिकतया दृश्यन्ते । अन्येषु कथासङ्ग्रहस्य एव प्राधान्यं दृश्यते । चम्पूभारतस्य अपि बहूनि व्याख्यानानि उपलभ्यन्ते ।

त्रिविक्रमभट्टः - त्रिविक्रमभट्टेन नलचम्पूः मदालसाचम्पूः च लिखिते । एतस्य अपरं नाम सिंहादित्यः इति । राष्ट्रकूटराजस्य तृतीय-इन्द्रस्य आस्थानकविः आसीत् एषः । दशमशतकस्य पूर्वार्धे एषः आसीत् ।

उपलब्धेषु चम्पूग्रन्थेषु नलचम्पूः एव आदिमा । महाभारतस्य वनपर्वणि स्थिता नलदमयन्तीकथा एव एतस्य ग्रन्थस्य कथावस्तु । किन्तु स्वयंवरपर्यन्तकथा नास्ति अत्र । अतः कथाभागः अपूर्णः इव दृश्यते । त्रिविक्रमः प्रौढकविः । अतः नलचम्पूग्रन्थे प्रौढा शैली दृश्यते । क्रियापदानां विविधानि रूपाणि कविः विशेषतः प्रयुङ्क्ते ।

नीलकण्ठदीक्षितः - एषः 'नीलकण्ठविजयचम्पूः' इति ग्रन्थं रचितवान् अस्ति । एषः प्रसिद्धपण्डितस्य अप्पय्यदीक्षितस्य सहोदरः । एतस्य पितुः नाम

नारायणदीक्षितः इति । मातुः नाम भूमिदेवी इति । नीलकण्ठदीक्षितः स्वग्रन्थे वदति - 'अहम् एतं ग्रन्थं ४७३८ तमे कलिवर्षे (क्रि. श. १६३६) रचितवान् इति । अतः एतत् तु स्पष्टं यत् एषः सप्तदशे शतके आसीत् इति । एषः मधुरैपाण्ड्यराजस्य तिरुमलनायकस्य आस्थानपण्डितः आसीत् । एषः महाकाव्यद्वयम्, एकं नाटकं, शतकद्वयं, दर्शनग्रन्थान् च रचितवान् अस्ति । एतस्य ३२ ग्रन्थाः उपलभ्यन्ते । समुद्रमथनकथा नीलकण्ठविजये वर्णिता अस्ति । एतस्मिन् ग्रन्थे ५ आश्वासाः सन्ति । काव्योचितप्रतिभा एतस्य कवेः । विडम्बनात्मकचित्रणे एषः निपुणः । मनोहरवर्णनानि एतस्य काव्ये बहूनि । अतः संस्कृतसाहित्ये एतस्य ग्रन्थस्य विशिष्टं स्थानमस्ति ।

वेङ्कटाध्वरिः - वेङ्कटाध्वरिः प्रसिद्धस्य विश्वगुणादर्शनामकस्य चम्पूग्रन्थस्य रचयिता । हस्तिगिरिचम्पूः, लक्ष्मीसहस्रं, यादवपाण्डवीयं, सुभाषितकौस्तुभः इत्यादयः ग्रन्थाः अपि एतेन रचिताः सन्ति । एषः रघुनाथदीक्षितस्य पुत्रः । एतस्य माता सीताम्बा । एषः नीलकण्ठदीक्षितस्य समकालीनः । अतः एषः अपि सप्तदशे शतके आसीत् इति निर्णीतम् अस्ति। वेङ्कटाध्वरिः श्रीवैष्णवमतानुयायी ।

विश्वगुणादर्शे स्वतन्त्रकल्पनायाः प्राधान्यम् । कृशानुः विश्वावसुः इत्येतौ गन्धर्वौ विश्ववैचित्र्याणि एतस्मिन् ग्रन्थे निरूपयतः । विमानेन देशपर्यटनं कुर्वन्तौ तौ देश-नगर-नदी-पुण्यस्थलादीनि जनव्यवहारान् च वर्णयतः । एतस्मिन् ग्रन्थे स्तबकादिभागाः न सन्ति । एकैकः विषयः एकैक-विभागायते । एतस्मिन् ग्रन्थे पद्यभागस्य एव आधिक्यम् । अनुस्यूता कथा अत्र नास्ति चेदपि मनोज्ञा अभिव्यक्तिः चित्तं रञ्जयति ।

कोविदः - पञ्चमः पाठः

प्रश्नाः

I. *रिक्तस्थलं पूरयत ।*

१. पुराकृतं कर्म .... अनुगच्छति ।
२. परिवारेण सह वर्तते इति .... ।
३. 'चम्पूभारत'ग्रन्थस्य रचयिता .... ।
४. स्वप्तुम् इच्छा .... ।

II. *विग्रहवाक्यानि लिखित्वा समासप्रभेदं निर्दिशत ।*

१. धनुष्पाणिः (अर्जुनः) ....
२. वक्रपुच्छः (शुनकः) ....
३. सुन्दरबाहुः (देवः) ....
४. भग्नपादः (क्रीडापटुः) ....
५. कलुषितहृदयः (दुर्जनः) ....
६. स्मितवदनः (कृष्णः) ....
७. लम्बोदरः (गणपतिः) ....
८. सशरम् (धनुः) ....

III. *रिक्तस्थानं पूरयत ।*

१. तितीर्षवः - तरीतुम् इच्छवः ; तितीर्षन्ति - ....
२. जिघृक्षवः - ग्रहीतुम् इच्छवः ; जिघृक्षन्ति - ....
३. जिघत्सवः - अत्तुम् इच्छवः ; जिघत्सन्ति - ....
४. निनीषवः - नेतुम् इच्छवः ; निनीषन्ति - ....
५. जिज्ञासवः - ज्ञातुम् इच्छवः ; जिज्ञासन्ति - ....

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 260) After completing the exercises check your answers.)

कोविदः - षष्ठः पाठः

।। आपत्काले च सम्प्राप्ते यन्मित्रं मित्रमेव तत् ।।

He alone is a friend, who remains a friend in adversity also.

- महाभारतम्

१. समासः

(अ) अव्ययीभावसमासः

Two words are combined to form this compound. The meaning of the first word is prominent and the first word in the compound is an indeclinable. Also, the compound word itself is an indeclinable.

Eg. - उपकृष्णम् = कृष्णस्य समीपे - Near Krishna.

Here, the compound is formed with the indeclinable 'उप' which means 'near' and the noun 'कृष्ण' । The compound word उपकृष्णम् is an indeclinable. Also, the sense of the first word 'उप' is prominent. Thus the example contains all the characteristic features of an Avyayibhava compound.

Avyayibhava compound is of many types. A few important ones are given below -

१. उपवृक्षम् - वृक्षस्य समीपे - Near the tree

२. अधिहरि - हरौ इति - In Hari

३. निर्जनम् - जनानाम् अभावः - without people (desolate)

४. यथाशक्ति - शक्तिम् अनतिक्रम्य - to the best of (not going beyond) one's ability.

५. अनुरूपम् - रूपस्य योग्यम् - Worthy of form (beauty)

६. प्रतिवृक्षम् - वृक्षं वृक्षं प्रति - Every tree.

In these examples, the indeclinables उप, अधि, निर्, यथा, अनु, प्रति - in different senses, are compounded.

(आ) सर्वसमासनियमाः

Now you know the six kinds of Samasa. Here are a few general points to be noted in connection with them -

1. In a समास, the former word will be in its प्रातिपदिक form (the base of a noun is known as प्रातिपदिक). Therefore the case ending of it is not visible.

   [As a matter of fact, when we compound two words the विभक्ति of both of them elides and a विभक्ति is newly added to the समस्तपद. But it is generally said that the विभक्ति of the पूर्वपद disappears.]

   Eg. - नीलमेघः - Here you do not find a विभक्तिप्रत्यय after the word 'नील' ।

2. Between two words of a समास, Sandhi should necessarily be effected.

   Eg. 1. भगवत् + अनुग्रहः = भगवदनुग्रहः - (जश्त्वसन्धि has taken place here.)

   2. राम + अनुजः = रामानुजः (सवर्णदीर्घसन्धिः)

   3. सार्ध + एकादशवादनम् = सार्धैकादशवादनम् (वृद्धिसन्धिः)

3. While dissolving a Samasa that has more than two words, you must take them two at a time. Only in द्वन्द्वसमास all the words in the compound can be dissolved in one विग्रहवाक्यम् । In the coming lesson you will learn in detail about compounds that have more than two words (बहुपदसमासाः).

   Eg. बहुपदद्वन्द्वः - रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च = रामलक्ष्मणभरतशत्रुघ्नाः

4. समस्तपद even if it ends with different cases, विग्रहवाक्य should

be written with 'prathama ending' and at the end तम्, तेन, तस्य... should be added to indicate the required 'vibhakti'.

Eg. - पीताम्बरेण - पीतम् अम्बरं यस्य सः, तेन
दशरथपुत्राय - दशरथस्य पुत्रः, तस्मै

२. विशेषविषयाः

अलङ्काराः

Hitherto, we have known in general different words and affixes used in Samskrit Language. Due to a variety of words and word formation the language has attained perfection. How are words construed ? What subtle meaning underlies the words ? - To analyse these questions we have a separate science viz, Alankara Shastra (Poetics or the science of figures of speech or poetry). Let us know about figures of speech or alankaras in this lesson.

Ramayana, Mahabharatha, Raghuvamsha, Shakuntala and others are literary works in Samskrit. We experience an inexplicable joy when we read these works. This joy is called चमत्कार or poetical charm. The sources of चमत्कार are - रस (Sentiment), गुण (Excellence), भाव (Feeling or Emotion) and अलङ्कार (figure of speech). Kavya or poetry is beautiful when these are present. Of these, we will briefly study Alankara here. Just as ornaments adorn a body, so do Alankaras adorn a Kavya. Alankaras are broadly of two kinds :

1. Shabdalankara (figure of speech in words)
2. Arthalankara (figure of speech in sense)

१. शब्दालङ्कारः - Shabdalankara

In Shabdalaṅkara sounds are important. In a composition, be it prose or poetry, if a consonant or consonants recur once, it is called 'छेकानुप्रासः' । If one or more consonants recur many times it is 'वृत्त्यनुप्रासः' । If a group of consonants in a certain order recur giving different meanings it is called 'यमकम्' ।

These are some familiar subdivisions of Shabdalankara.

Eg. - १. शारदा शारदाम्भोजवदना वदनाम्बुजे । - *छेकानुप्रासः*

२. तव स्तन्यं मन्ये धरणिधरकन्ये .... - *वृत्त्यनुप्रासः*

३. सरस्वति प्रसादं मे स्थितिं चित्तसरस्वति ।
सर स्वति कुरु क्षेत्रकुरुक्षेत्रसरस्वति ।। - *यमकम्*

२. अर्थालङ्कारः - Arthalankara

In Arthalankara sense is more predominent than sound. It has many sub-divisions. A few of them are given here.

१. उपमालङ्कारः (Simile) - It is the most important among all the Alankaras. If an object is compared with another object in respect of atleast one common attribute it is called Upamalankara.

Eg. - मुखं चन्द्रः इव सुन्दरम् ।
Face is beautiful like the moon.

This Alankara has four parts.

१. *उपमेयम्* - The object of comparison- मुखम् - 'face', in the example.

२. *उपमानम्* - Object compared to (it should be well-known) चन्द्रः - 'the moon', in the example.

३. *साधारणधर्मः* - Common attribute. सुन्दरम् - 'beautiful' in the example.

४. *उपमावाचकम्* - The term denoting similarity इव - 'like' in the example. यथा, वत्, सदृश etc are also Upamavachakas.

When all these four are explicitly stated it is called 'पूर्णोपमा'। When any of these ie., the साधारणधर्म or वाचकशब्द is not explicitly stated it is called लुप्तोपमा ।

Eg. - वाणी सुधा इव अस्ति ।
Speech is (sweet) like nectar.

Here the common attribute viz. 'sweet' is not mentioned. Therefore it is 'लुप्तोपमा' ।

Here are some more examples of उपमालङ्कार, wherein the उपमान, उपमेय etc. have been identified.

1. कृष्णः मेघवत् श्यामलः ।

उपमानम् - मेघः उपमेयम् - कृष्णः

वाचकम् - वत् साधारणधर्मः - श्यामलत्वम्

2. अभिमन्युः अपि शूरः यथा अर्जुनः ।

उपमानम् - अर्जुनः उपमेयम् - अभिमन्युः

वाचकम् - यथा साधारणधर्मः - शौर्यम्

3. कुम्भकर्णः तालवृक्षः इव आसीत् ।

उपमानम् - तालवृक्षः कुम्भकर्णः - उपमेयम्

वाचकम् - इव साधारणधर्मः - (औन्नत्यम्)

4. एषः नृपः कर्णसदृशः ।

उपमानम् - कर्णः उपमेयम् - नृपः

वाचकः - सदृशः साधारणधर्मः - (दानशीलता)

In the third and fourth example, the sadharana dharma is not mentioned. It has been inferred.

अभ्यासाः

I. *अधः दत्तानि विग्रहवाक्यानि अवलम्ब्य समस्तं पदं लिखत ।*

१. नगरस्य समीपे - ....
२. आत्मनि इति - ....
३. विधिम् अनतिक्रम्य - ....
४. वने वने - ....
५. गुणस्य योग्यम् - ....
६. मक्षिकाणाम् अभावः - ....
७. जने जने - ....
८. सङ्ख्याम् अनतिक्रम्य - ....
९. अर्थम् अर्थम् - ....
१०. आदेशम् अनतिक्रम्य - ....

II. *विग्रहवाक्यानि लिखत ।*

१. यथामति - ....
२. निर्भयम् - ....
३. प्रतिविद्यालयम् - ....
४. उपकृष्णम् - ....
५. यथाक्रमम् - ....
६. प्रतिदिनम् - ....
७. उपवनम् - ....
८. प्रतिमासम् - ....
९. निर्दोषम् - ....
१०. लोके इति - ....

III. *अधोनिर्दिष्टेषु आवरणस्थयोः पदयोः स्थाने समस्तं पदं लिखत ।*

१. (ग्रामस्य समीपे) .... नदी प्रवहति ।
२. (मतिम् अनतिक्रम्य) .... उत्तरं वदामि ।
३. भिक्षुकः (ग्रामं ग्रामं) .... गच्छति ।
४. नवरात्रोत्सवकाले (गृहे गृहे) .... सरस्वतीपूजा प्रचलति ।
५. (सदने सदने) .... संस्कृतं विलसेत् । (सदनम् = गृहम्)
६. संन्यासी (कुटीरस्य समीपे) .... उपविशति ।
७. गुरुः (शास्त्रम् अनतिक्रम्य) .... बोधयति ।
८. (बोधनम् अनतिक्रम्य) .... छात्रेण उत्तरं लिखितम् ।
९. (क्रमम् अनतिक्रम्य) .... सः पूजां कृतवान् ।
१०. (आचार्यस्य समीपे) .... शिष्याः उपविशन्ति ।

IV. *अधोनिर्दिष्टेषु उपमानोपमेयादिकं निर्दिशत ।*

१. ललनायाः मुखं चन्द्रवत् सुन्दरम् ।
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....

२. गृहं प्रासादः इव विशालम् अस्ति ।
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....
३. पयोहिमं हिमम् इव शीतलम् । (पयोहिमम् - Ice Cream)
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....
४. तस्याः नेत्रे कमलदलसदृशे ।
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....
५. तस्य ध्वनिः कोकिलस्य इव ।
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....

(**Note:** Answers for the above exercises are given in the end of this book. (P.No 261) After completing the exercises check your answers.)

३. सुभाषितानि

११. पादपानां भयं वातात् पद्मानां शिशिराद् भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनाद्भयम् ॥

पदविभागः

पादपानाम्, भयम्, वातात्, पद्मानाम्, शिशिरात्, भयम्, पर्वतानाम्, भयम्, वज्रात्, साधूनाम्, दुर्जनात्, भयम् ।

अन्वयः


इत्यपि नास्ति । प्रत्येकं श्लोकः अपि पृथक् काव्यमिव रसभावादिपरिपूर्णः भवति । शृङ्गारः, नीतिः, भक्तिः, धर्मः, सन्देशः इत्यादयः विषयाः खण्डकाव्येषु वर्णिताः दृश्यन्ते ।

प्रसिद्धानि कानिचित् खण्डकाव्यानि

मेघदूतम् ऋतुसंहारः	-	कालिदासः
गाथासप्तशती	-	हालराजः
आर्यासप्तशती	-	गोवर्धनः
शृङ्गारशतकम्	-	भर्तृहरिः
अमरुशतकम्	-	अमरुकः
भामिनीविलासः	-	जगन्नाथः

दूतकाव्यम्

खण्डकाव्यस्य एव अपरः प्रभेदः दूतकाव्यम् । इष्टं जनं प्रति दूतद्वारा सन्देशप्रेषणमेव अत्रत्यं वैशिष्ट्यम् । रामायणे रामः सीतां प्रति आञ्जनेय-द्वारा सन्देशं प्रेषयति । नलः दमयन्तीं प्रति हंसद्वारा सन्देशं प्रेषयति । एतस्मात् सन्देशप्रेषणव्यवहारात् प्रभावितः सन् कालिदासः मेघदूतं लिखितवान् इति प्रतिभाति । मेघदूततः एव दूतकाव्यानाम् आरम्भः जातः इति वक्तुं शक्यते । *(मेघदूतं खण्डकाव्यस्य उदाहरणम् इति पूर्वं सूचितम् अस्ति । दूतकाव्यं खण्डकाव्यस्य एव अन्यः प्रभेदः इति कारणतः तत्रापि तस्य नाम लिखितम् ।)*

मेघदूतम्

कश्चित् यक्षः शापवशात् स्वप्रियायाः बहुदूरे रामगिर्याश्रमे निवसति । आषाढमासस्य आरम्भे मेघं दृष्ट्वा सः विरहोत्कण्ठितः भवति । तं मेघमेव दूतं कृत्वा तद्द्वारा प्रियायै सन्देशं प्रेषयति सः । रामगिरितः अलकानगरीं प्रति गमनमार्गस्य, मार्गे स्थितानां नगराणां, नदीनां, जनपदानां च वर्णनं, पत्नीं प्रति सन्देशनिरूपणं च अतीव मनोहरशैल्या अत्र निरूपितम् अस्ति । मेघदूतस्य शैल्या सौन्दर्येण च प्रभाविताः सन्तः बहवः अनन्तरं दूतकाव्यानि रचितवन्तः ।

प्रसिद्धानि कानिचित् दूतकाव्यानि

हंससन्देशः	-	वेदान्तदेशिकः
पवनदूतम्	-	धोयीकविः
चन्द्रदूतम्	-	जम्बूकविः
घटकर्परः	-	घटकर्परः

७. संस्कृतग्रन्थकारपरिचयः

कालिदासः - वरकविः कविकुलगुरुः इति प्रसिद्धस्य कालिदासस्य कालः, देशः, व्यक्तित्वम् इत्यादीनां विषये निर्णेतुं योग्यं प्रमाणं न लभ्यते । केषाञ्चन विदुषाम् अभिप्रायः यत् सः चतुर्थशतके आसीत् इति । तस्य काव्येषु उज्जयिन्याः वर्णनम् अधिकं दृश्यते इति कारणतः तस्य जन्मस्थलम् उज्जयिनी स्यात् इति अभिप्रायः अस्ति । कालिदासः रघुवंशं, कुमारसम्भवम् इति महाकाव्यद्वयम्, ऋतुसंहारं, मेघदूतमिति खण्डकाव्यद्वयं, मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् इति नाटकत्रयं च लिखितवान् ।
कवित्वं, शास्त्रज्ञानं, लोकानुभावः - एतेषां त्रयाणाम् अपि सुन्दरः समन्वयः कालिदासस्य कृतिषु दृश्यते । भारतीयानाम् उत्कृष्टा जीवनपरम्परा अपि तासु प्रतिबिम्बिता अस्ति ।
अत्यन्तं समुचितायाः उपमायाः निबन्धने कालिदासः अतीव निपुणः । तस्य सर्वासु कृतिषु एषः अंशः स्फुटं दृश्यते । *'उपमा कालिदासस्य'* इति उक्तिस्तु सुप्रसिद्धा एव ।
न केवलं संस्कृतसाहित्यम्, अपि तु समग्रं भारतीयसाहित्यमेव कालिदासात् प्रभावितम् अस्ति इति वक्तुं शक्यते । अतः एव सः वस्तुतः कविकुलगुरुः ।

भारविः - भारवेः जन्मनाम दामोदरः । एतस्य पिता नारायणस्वामी । दामोदरः चालुक्यराजस्य विष्णुवर्धनस्य मित्रम् आसीत् । एषः गङ्गराजस्य दुर्विनीतस्य आस्थाने, पल्लवराजस्य सिंहविष्णोः आस्थाने च कञ्चित् कालम् आसीत् इत्यपि ज्ञायते । क्रि. श. षष्ठे शतके भारविः आसीत् ।
'किरातार्जुनीयं' भारवेः सुविख्यातं काव्यम् । महाभारते विद्यमानम् एव कथावस्तु स्वीकृत्य भारविः एतत् महाकाव्यं रचितवान् अस्ति । विशिष्टार्थगर्भितानां वाक्यानां प्रयोगे भारविः अत्यन्तं निपुणः । 'हितं मनोहारि च दुर्लभं वचः', 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतम्

अभिप्रायं समर्थयन्ति । *'भारवेः अर्थगौरवम्'* इति उक्तिः अपि विमर्शकलोके प्रसिद्धा । एकमेव महाकाव्यं लिखित्वा अपि भारविः स्वकवित्वेन, पाण्डित्येन, वर्णनकौशलेन च कविप्रपञ्चे विशिष्टं स्थानं प्राप्तवान् ।

माघः - गुर्जरदेशस्य राज्ञः श्रीवर्मलातस्य मन्त्री सुप्रभदेवः । सुप्रभदेवस्य पौत्रः माघः इति श्रूयते । क्रि. श. सप्तमे शतके सः आसीत् इति विदुषाम् अभिप्रायः । माघः भारवेः अनन्तरकालीनः ।

'शिशुपालवधं' माघेन विरचितम् अद्वितीयं महाकाव्यम् । भारवेः किरातार्जुनीयं परिशील्य 'तत्सदृशमेव काव्यं लेखनीयम्' इति बुद्ध्या एव माघः शिशुपालवधं रचितवान् इति भासते । यतः बहुषु अंशेषु किरातार्जुनीयस्य साम्यम् एतस्मिन् काव्ये दृश्यते । माघः राजनीतिविशारदः । अलङ्कारशास्त्रे व्याकरणशास्त्रे च तस्य महत् पाण्डित्यम् आसीत् । स्वकीयस्य नानाविषयकस्य अपारस्य च ज्ञानस्य प्रदर्शनं कृतवान् अस्ति सः शिशुपालवधे । नूतनशब्दानां प्रयोगे अपि सः अत्यन्तं निपुणः । शब्दानाम् अक्षयः सङ्ग्रहः एव तस्मिन् आसीत् इति वक्तुं शक्यते ।

भारविः इव माघः अपि एकमेव महाकाव्यं लिखित्वा अपि महाकविपदं प्राप्तवान् ।

श्रीहर्षः - श्रीहर्षः कान्यकुब्जस्य नृपस्य विजयचन्द्रस्य आस्थानविद्वान् आसीत् । विजयचन्द्रस्य पुत्रस्य जयन्तचन्द्रस्य आस्थाने अपि सः आसीत् इति श्रूयते । तस्य पिता श्रीहरिः । माता मामल्लदेवी । श्रीहर्षः द्वादशशतके आसीत् । तर्क-व्याकरण-वेदान्तादिषु शास्त्रेषु श्रीहर्षः उद्दामपण्डितः । सर्वाणि अपि पुराणानि सः सम्यक् जानाति स्म । श्रीहर्षेण रचितं महाकाव्यं नैषधीयचरितम् । नल-दमयन्त्योः कथा अत्र वर्णिता अस्ति । श्रीहर्षस्य भाषा अत्यन्तं प्रौढा । शब्दकर्कशता, दुरूह्या कल्पना, अर्थक्लिष्टता, श्लेषप्रियता च नैषधीयचरिते सर्वत्र दृश्यते ।

श्रीहर्षः अन्यान् अपि कांश्चित् ग्रन्थान् लिखितवान् इति उल्लेखः दृश्यते । परन्तु ते सर्वे न उपलभ्यन्ते । खण्डनखण्डखाद्यम् इति एकः ग्रन्थः उपलभ्यते । तस्मिन् ग्रन्थे तार्किकमतस्य खण्डनं कृतं दृश्यते ।

कोविदः - सप्तमः पाठः

प्रश्नाः

I. *अधोलिखितानि वाक्यानि शुद्धानि उत अशुद्धानि इति लिखत ।*

१. सत्सङ्गतिः पुण्यं चुलुकीकरोति । (.........)
२. चन्द्रमाः प्रत्युपकारलिप्सया कुमुदावबोधं करोति । (........)
३. हंसः दमयन्त्या प्रासादे मिलितः । (........)
४. यागशतेन इन्द्रपदवी लभ्यते । (.........)
५. दिलीपः विचारमूढः अस्ति । (..........)
६. एकं पदम् अनेकान् अर्थान् वदति चेत् श्लेषः । (.........)
७. मेघदूतं किञ्चन महाकाव्यम् । (.........)
८. भारविणा बहूनि काव्यानि लिखितानि । (........)
९. किरातार्जुनीयस्य साम्यं शिशुपालवधे बहुषु अंशेषु दृश्यते । (.......)
१०. नैषधीयचरिते नलदमयन्त्योः कथा उपवर्णिता । (.......)

II. *रिक्तस्थानानि पूरयत -*

अ. उपमानोपमेययोः सादृश्यम् उक्तं चेत् .... ।
आ. उपमानोपमेययोः अभेदः उक्तः चेत् .... ।
इ. सामान्येन विशेषस्य, विशेषेण सामान्यस्य वा समर्थनं कृतं चेत् .... ।
ई. उपमानमात्रम् उक्तं चेत् .... ।

III. *विग्रहवाक्यम् उक्त्वा समासनाम लिखत ।*

१. शास्त्रज्ञः = ...
२. समासनाम = ...
३. मुखचन्द्रः = ...
४. सधनः = ...
५. निर्मक्षिकम् = ...

(**Note:** Answers for the above exercises are given in the end of this book. (PNO - 262) After completing them, check your answers.)

कोविदः - अष्टमः पाठः

।। निसर्गः स हि धीराणां यदापद्यधिकं दृढाः ।।

"To remain even more steadfast in adversity, is the nature of brave men."

१. समासः

In the previous lessons, you have learnt about the six kinds of compounds and their identification. There you have come across compounds which are formed with two words. In Samskrit there are compounds formed with more than two words also.

Eg. - रामरावणयुद्धम्, पुण्यक्षेत्रदर्शनलाभः

Let us now see how these compounds are formed. Words, two at a time, are compounded and these compounds again enter into combination with another word which may again be a compound, to form a single long compound word. In this lesson we shall introduce you to such compounds.

'रामरावणयुद्धम्' - There are three words in this compound. 'राम' and 'रावण' are first compounded to form Dvandva samasa as रामः च रावणः च - रामरावणौ । To this compound word the third word 'युद्धम्' is added to form Genitive Tatpurusha, the vigraha of which is रामरावणयोः युद्धम्. As pointed out in the earlier lessons, analysis of words and their sense is important in dissolving compounds. Now let us see another example.

'पुण्यक्षेत्रदर्शनलाभः' consists of four words. Karmadharaya occurs between पुण्य and क्षेत्र, Genitive Tatpurusha between पुण्यक्षेत्र and दर्शन and once again Genitive Tatpurusha between

पुण्यक्षेत्रदर्शन and लाभ. The विग्रहवाक्य in stages, is -

१. पुण्यं च तत् क्षेत्रं च = पुण्यक्षेत्रम् - *कर्मधारयः*

२. पुण्यक्षेत्रस्य दर्शनम् = पुण्यक्षेत्रदर्शनम् - *षष्ठीतत्पुरुषः*

३. पुण्यक्षेत्रदर्शनस्य लाभः = पुण्यक्षेत्रदर्शनलाभः - *षष्ठीतत्पुरुषः*

Try to dissolve long compound words in the manner shown above. Follow these steps while dissolving compounds having more than two words.

1. Identify all the words that make up the long compound word.
2. Know the meaning of the whole compound word. You will then understand the relationship between the individual words within the Samasa.
3. Dissolve the first two words to startwith. (Always remember that the विग्रहवाक्य must be according to the meaning of the word). Ascertain the correct अन्त, लिङ्ग and वचन of words before adding the विभक्तिप्रत्यय to the individual words in the विग्रहवाक्य ।
4. After dissolving the first two words take that compound word as the पूर्वपद and add to it the next word in the long compound and write the विग्रहवाक्य । In this way, add the words one by one to the compound word just formed until you reach the last word in the long compound word.
5. At every step identify the type of Samasa and name it. Do verify whether it is according to the meaning intended or not.

For better understanding read the following sentences.

1. संस्कृतभाषाप्रचारम् अहम् इच्छामि ।
   I like propagation of Samskrit language.
   संस्कृतम् इति भाषा - संस्कृतभाषा - *सम्भावनापूर्वपदः कर्मधारयः*
   संस्कृतभाषायाः प्रचारः, तम् - संस्कृतभाषाप्रचारम् - *षष्ठीतत्पुरुषः*

2. तस्य पुस्तकपठनप्रवृत्तिः अस्ति ।
   He has the habit of reading books.
   पुस्तकस्य पठनम् - पुस्तकपठनम् - *षष्ठीतत्पुरुषः*

पुस्तकपठनस्य प्रवृत्तिः - पुस्तकपठनप्रवृत्तिः - *षष्ठीतत्पुरुषः*

3. सा **कथासरित्सागरं** पठति ।
   She reads Kathasaritsagara.
   कथाः एव सरितः - कथासरितः - *अवधारणापूर्वपदः कर्मधारयः*
   कथासरितां सागरः, तम् - कथासरित्सागरम् - *षष्ठीतत्पुरुषः*
4. **नलमहाराजकथा** अतिरमणीया अस्ति ।
   The story of the great king Nala is very interesting.
   महान् राजा - महाराजः - *विशेषणपूर्वपदः कर्मधारयः*
   नलः इति महाराजः - नलमहाराजः - *सम्भावनापूर्वपदः कर्मधारयः*
   नलमहाराजस्य कथा - नलमहाराजकथा - *षष्ठीतत्पुरुषः*
5. **कालिदासबाणादिकविकृतयः** पठनीयाः ।
   The works of poets like Kalidasa, Bana and others must be read.
   कालिदासश्च बाणश्च - कालिदासबाणौ - *इतरेतरद्वन्द्वः*
   कालिदासबाणौ आदौ येषां ते - कालिदासबाणादयः - *बहुव्रीहिः*
   कालिदासबाणादयश्च ते कवयश्च - कालि.....कवयः - *वि.पू.- कर्मधारयः* कालिदास..कवीनां कृतयः - कालिदास...कृतयः
   - *षष्ठीतत्पुरुषः*
6. महाभारतं **शान्तिरसप्रधानकाव्यम्** अस्ति ।
   Mahabharata is a literary work where the sentiment of tranquillity is predominant.
   शान्तिः इति रसः शान्तिरसः - *सम्भावनापूर्वपदः कर्मधारयः*
   शान्तिरसः प्रधानः यस्य तत् - शान्तिरसप्रधानम् - *बहुव्रीहिः*
   कालिदासबाणादयश्च ते कवयश्च - कालिदास...कवयः
   - *वि.पू.कर्मधारयः*
   शान्तिरसप्रधानं च तत् काव्यं च - शान्ति....काव्यम्
   - *वि.पू.कर्मधारयः*
7. **चलचित्रगीतश्रवणे** तस्य महती रुचिः ।
   He is very fond of listening to film songs.
   चलं च तत् चित्रं च - चलचित्रम् - *विशेषणपूर्वपदः कर्मधारयः*

चलचित्राणां गीतानि - चलचित्रगीतानि - *षष्ठीतत्पुरुषः*
चलचित्रगीतानां श्रवणं, तस्मिन् - चलचित्रगीतश्रवणे - *षष्ठीतत्पुरुषः*

8. सः **भारतदेशवाससौभाग्यसन्तुष्टः** अस्ति ।
He is content with the good fortune of living in India.
भारतम् इति देशः - भारतदेशः - *सम्भावनापूर्वपदकर्मधारयः*
भारतदेशे वासः - भारतदेशवासः - *सप्तमीतत्पुरुषः*
भारतदेशवासस्य सौभाग्यम् - भारत...सौभाग्यम् - *षष्ठीतत्पुरुषः*
भारत...सौभाग्येन सन्तुष्टः - भारतः..सन्तुष्टः - *तृतीयातत्पुरुषः*

In this manner by compounding words one after the other we can make long compound words. When you read Samskrit literature pay attention to such compound words and try dissolving them.

२. विशेषविषयाः

छन्दः - १

We know that there are two types of literary works (Kavya) - Prose (Gadya) and Poetry (Padya). Kumara Sambhava and such others come under poetry. Dashakumaracharita and such others are prose kavyas. Poetry is a composition regulated by metre. The composition that is not so is Prose. 'Chandas' is the metrical arrangement of syllables in verse, that gives delight.

Before going into the details of the subject let us refresh our memory about the letters in Samskrit. There are thirteen vowels among which अ, इ, उ, ऋ, ऌ are short, आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ are long. When we add these vowels to consonants gunitaksharas are formed. Eg. क् + अ = क, क् + आ = का etc. A Vowel or a Gunithakshara is regarded as a syllable and not a mere consonant. In the word अवाक् there are only two syllables अ and वा.

Chandas is of two kinds 1) Varna chandas (metres based on syllables) 2) Matra chandas (Metres based on syllabic instants).

Here in, are given a few metres belonging to the former. But before that, let us know about 'Guru' and 'Laghu' - the terms used for syllables in Prosody.

1. All short vowels and Gunitaksharas having short vowels, are regarded as Laghu, and marked as '∪'

   ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪
   Eg. - अ इ उ ऋ क गि तु पृ

2. All long vowels and Gunitaksharas having long vowels are regarded as Guru and marked as '–'

   – – – – – – – – – –
   Eg. - आ ई ऐ ओ की चू दे पै शे क्षा

3. All syllables followed by Anuswara or Visarga are considered as Guru.

   – – ∪ – ∪ –
   Eg. - कंसेन दुःखितः

4. A syllable followed by a mere consonant or a **संयुक्ताक्षर** is regarded as a Guru.

   – – –
   Eg. - अच् तम् सत्य

   In the above examples **अ**, **त** and **स** (though these syllables have short vowels) are marked as Guru, because they are followed by consonants and a **संयुक्ताक्षर** । **च्** and **म्** are not full syllables. Therefore they are not marked. **त्य** having a short vowel is marked as Laghu.

   Now you should be able to understand the marking of the following words.

∪– – ∪ – – – ∪ – – – ∪– ∪ – –∪–∪ – – ∪ –
गणेशः किरीटम् सन्ततिः अन्तःपुरे कृपा पर्वतस्य हंसेन सत्

Gana - In the system of Varnachandas three letters or syllables make one Gana. According to the position of Laghu and Guru, eight kinds of Ganas are formed.

Table of Ganas

यगणः ➪ First syllable is laghu. The other two are guru. ∪— — नयाचे

रगणः ➪ Middle syllable is laghu. The other two are guru. — ∪— पार्वती

तगणः ➪ Last syllable is laghu. The other two are guru. — — ∪ आयाति

भगणः ➪ First syllable is guru. The other two are laghu. — ∪∪ आनय

जगणः ➪ Middle syllable is guru. The other two are laghu ∪ — ∪ निनिन्द

सगणः ➪ Last syllable is guru. The other two are laghu ∪∪— ललना

मगणः ➪ All syllables are gurus. — — — सीताय

नगणः ➪ All syllables are laghus. ∪∪∪ भवति

In the first, second and third places **यगण**, **रगण** and **तगण** have laghu and **भगण**, **जगण** and **सगण** have guru respectively. **मगण** has all **गुरु** and **नगण** has all **लघु** ।

To remember these Ganas there is a simple formula **'यमाताराजभानसलगम्'**

Its application is like this - In the formula make ganas of three syllables each and mark guru and laghu syllables. This forms the example of that gana, which the first syllable represents.

For Eg. - यमाता - **यमाता** is **यगण** with a short syllable in the beginning. Similarly,

— — —	— — ∪	— ∪ —	∪ — ∪	— ∪∪	∪∪∪	∪∪ —
मातारा	ताराज	राजभा	जभान	भानस	नसल	सलगम्

The first syllable gives the name of the Gana. The letters 'ल' and 'गम्' in the sutra (aphorism) respectively stand for laghu and guru. Marking Laghu Guru and naming the ganas, is called scanning.

अभ्यासः

I. *अधोनिर्दिष्टानां समस्तपदानां विग्रहवाक्यं लिखत ।*

१. कर्णार्जुनयुद्धम्
(अ) .... = ...
(आ) .... = ...

२. संस्कृतसाहित्यपरिचयः
(अ) .... = ...
(आ) .... = ...

३. पवित्रतीर्थस्नानम्
(अ) .... = ...
(आ) .... = ...

४. देवसेवाभाग्यम्
(अ) .... = ...
(आ) .... = ...

५. धनलाभमुदितः
(अ) .... = ...
(आ) .... = ...

II. *अधोनिर्दिष्टानां विग्रहवाक्यं लिखित्वा समासनाम अपि लिखत ।*

१. काव्यपठनाभ्यासः
(अ) .... = ... - ....
(आ) .... = ... - ....

२. निद्राभावसमस्याग्रस्तः
(अ) .... = ... - ....
(आ) .... = ... - ....

(इ) .... = ... - ....

३. सुन्दरनृत्यदर्शनभाग्यम्

(अ) .... = ... - ....

(आ) .... = ... - ....

(इ) .... = ... - ....

४. परिसरमालिन्यजातदोषः

(अ) .... = ... - ....

(आ) .... = ... - ....

(इ) .... = ... - ....

५. दूरवाणीशब्दश्रवणसमनन्तरम्

(अ) .... = ... - ....

(आ) .... = ... - ....

(इ) .... = ... - ....

III. *गुरुलघुचिह्नम् अङ्कयत ।*

१. माधवः - .... २. सरस्वती - ....

३. शङ्करः - .... ४. गुणवती - ....

५. संस्कृतभाषा - .... ६. कर्तरी - ....

७. लम्बोदरः - .... ८. यमुना - ....

९. लेखनी - .... १०. गणना - ....

IV. *गुरुलघुचिह्नानि अङ्कयित्वाः गणनाम अपि निर्दिशत ।*

१. सम्भवः - .... - ....

२. ननान्दा - .... - ....

३. सामान्यः - .... - ....

४. चालय - .... - ....

५. भरतः - .... - ....

६. जगाद - .... - ....

७. क्रीणाति - .... - ....

८. भरणी - .... - ....

९. अटति - .... - ....

१०. दन्तोष्ठौ - .... - ....

V. *रिक्तस्थानानि पूरयत ।*

१. 'U' चिह्नयुक्तः .... इति उच्यते ।

२. गणे .... अक्षराणि भवन्ति ।

३. संयुक्ताक्षरात् पूर्वं स्थितः वर्णः .... भवति ।

४. अनुस्वारयुक्तः वर्णः .... भवति ।

५. छन्दश्शास्त्रदृष्ट्या 'सुसम्पत्' इत्यत्र .... अक्षराणि ।

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 263) After completing the exercises check your answers.)

३. सुभाषितानि

१५. व्याधितस्यार्थहीनस्य देशान्तरगतस्य च ।
नरस्य शोकदग्धस्य सुहृद्दर्शनमौषधम् ॥

पदविभागः

व्याधितस्य, अर्थहीनस्य, देशान्तरगतस्य, च, नरस्य, शोकदग्धस्य, सुहृद्दर्शनम्, औषधम् ।

अन्वयः

व्याधितस्य अर्थहीनस्य देशान्तरगतस्य शोकदग्धस्य च नरस्य सुहृद्दर्शनम् औषधम् ।

अन्वयार्थः

व्याधितस्य = रोगपीडितस्य, अर्थहीनस्य = धनहीनस्य, देशान्तरगतस्य = अन्यं देशं प्रति गतस्य, शोकदग्धस्य = दुःखेन पीडितस्य, च, नरस्य = मनुष्यस्य, सुहृद्दर्शनम् = मित्रस्य दर्शनम्, औषधम् = दुःखनिवारकम् ।

तात्पर्यम्

प्रायः लोके सर्वेषाम् अपि स्नेहिताः भवन्ति एव । बान्धवाः बहवः स्युः नाम, तथापि मित्राणि सन्ति चेत् एव तस्य नरस्य जीवनं सुखि जीवनम् । यतः यस्य मित्राणि भवन्ति तस्य जीवने सर्वविधसौख्यम् अपि भवति ।

मनुष्यस्य कष्टसमये मित्रं सान्त्वनवचनैः, अन्येन प्रकारेण वा साहाय्यम् आचरति । तत्रापि रुग्णावस्थायां, दारिद्र्यदशायां, देशान्तरनिवासप्रसङ्गे, दुःखावस्थायां च यदि मित्राणां दर्शनं भवति तर्हि तत् औषधमिव सर्वमपि कष्टं दुःखं च परिहरति ।

१६. सुहृद्भिराप्तैरसकृद्विचारितं
स्वयं च बुद्ध्या प्रविचारिताश्रयम् ।
करोति कार्यं खलु यः स बुद्धिमान्
स एव लक्ष्म्या यशसां च भाजनम् ।।

पदविभागः

सुहृद्भिः, आप्तैः, असकृत्, विचारितम्, स्वयम्, च, बुद्ध्या, प्रविचारिताश्रयम्, करोति, कार्यम्, खलु, यः, सः, बुद्धिमान्, सः, एव, लक्ष्म्याः, यशसाम्, च, भाजनम् ।

अन्वयः

यः सुहृद्भिः आप्तैः असकृत् विचारितं, स्वयं बुद्ध्या प्रविचारिताश्रयं च कार्यं करोति सः खलु बुद्धिमान् । सः एव लक्ष्म्याः यशसां च भाजनम् ।

अन्वयार्थः

यः, सुहृद्भिः = मित्रैः सह, आप्तैः = हितैषिभिः सह, असकृत् = अनेकवारं, विचारितं = विमृश्य कृतं, स्वयं, बुद्ध्या = मत्या, प्रविचारिताश्रयम् = सम्यक् विचार्य आश्रितं, च, कार्यं करोति, सः खलु, बुद्धिमान् = मतिमान्, सः एव = तादृशः नरः एव, लक्ष्म्याः = सम्पदः, यशसां च = कीर्तीनां च, भाजनम् = पात्रं भवति ।

तात्पर्यम्

कस्यचित् कार्यस्य आरम्भे सर्वैः तस्य कार्यस्य साधकं बाधकं च विचारणीयम् । तदर्थम् आरम्भे मित्रैः सह आलोच्य, हितैषिभिः सह सम्मन्त्र्य, कार्यारम्भः करणीयः । अपि च सर्वेषाम् अभिप्रायान् श्रुत्वा ततः स्वयम् अपि कार्यविषये आलोच्य अग्रे गन्तव्यम् । एवं यः कार्यम् आरभते सः सम्पदम् अपि प्राप्नोति, यशसः पात्रमपि भवति इत्यत्र नास्ति संशयः ।

४. काव्यकथा

इन्द्रादिभिः देवैः प्रेषितः नलः भैम्याः प्रासादं प्राप्तवान् । सः दूरतः दमयन्तीम् अपश्यत् । तत्र शताधिकाः सख्यः आसन् । ततः नलः भैम्याः सभाभवनम् अगच्छत् । भैम्याः समीपे काचित् दूती आसीत् । सा इन्द्रेण प्रेषिता । वरुणः अग्निः, यमः - इमे दिक्पालाः अपि दूतीः प्रेषितवन्तः । किन्तु दमयन्ती ताः सर्वाः अपि निराकृतवती । दूती भैमीसमीपे इन्द्रं प्रशंसति स्म, ''इन्द्रः भवत्या वरणीयः'' इति कथयति स्म च । ''यदि त्वम् इन्द्रस्य पत्नी भविष्यसि तर्हि सर्वे देवाः त्वां नमस्करिष्यन्ति । इन्द्रः तव पतिः भविष्यति । साक्षात् विष्णुः तव देवरः भविष्यति । विष्णोः पत्नी तव याता[1] भविष्यति । अतः इन्द्रस्य पाणिं गृहाण'' इति वदति स्म सा । भैम्याः सख्यः अपि तस्याः वचनं साधु इति अवोचन् ।

किन्तु दमयन्ती दूत्याः वचनं स्पष्टतया निराकृतवती । ''पूर्वम् एव मम पतिः नलः एव इति निश्चितं मया । सः निश्चयः नैव व्यत्यस्तः भविष्यति'' इति सा अवदत् । मायाशरीरेण स्थितः नलः इदं वचनं श्रुत्वा बहु आनन्दितः अभवत् । स्वस्मिन् विद्यमानम् अनुरागभावं ज्ञात्वा बहुधा मनसि एव तां प्राशंसत् । ततः नलः निजरूपेण दमयन्त्याः पुरतः प्रकटीबभूव[2] ।

यदा नलः पुरतः दृष्टः तदा दमयन्ती सः एव नलः इति न अभिज्ञातवती । तम् उद्दिश्य सा - ''भोः पुरुषश्रेष्ठ ! मम पुण्येन तव सन्दर्शनं जातम् । भवान् कः ? कथं वा अन्तःपुरं प्रविष्टः ? तव शरीरम् अस्ति । अतः त्वं मन्मथः न । मन्मथस्य तु शरीरं नास्ति । त्वम् अश्विनीकुमारः अपि न । यतो हि अश्विनीकुमारौ सदा द्वौ एव भवतः । अतः विशेषकुतूहलेन पृच्छामि । भवान् कः ?'' इति पृष्टवती ।

दमयन्तीवचनेन नलः तुष्टः । तथापि सः निवेदयति - ''कल्याणि ! बाल्यात् प्रभृति तव निर्मलान् गुणान् श्रुत्वा इन्द्रादयः चत्वारः अपि त्वयि अनुरक्ताः । ते सर्वे त्वाम् एव ध्यायन्तः सन्ति । श्वः तव स्वयंवरः भविष्यति इति ज्ञात्वा ते चत्वारः अपि स्वयंवरार्थं प्रस्थिताः । एतं विषयं निरूपयितुं ते माम् अग्रे प्रेषितवन्तः । अहं तेषां दूतः । त्वं दिक्पालकेषु एकं वृणीष्व[3] । मम दौत्यं सफलं कुरु'' इति ।

नलस्य वचनं श्रुत्वा दमयन्ती - ''भोः ! किम् इदम् ? भवतः कुलं, नाम च मया पृष्टम् । भवान् अन्यत् एव उक्तवान् । भवतः वंशः कः ? तद्विषये विवरणं ज्ञातुम् अहम् उत्सहे'' इति अवोचत् ।

तदा नलः वदति - ''यदा प्रत्यक्षम् एव आवां स्वः, तदा नामकथनस्य किं प्रयोजनम् ? वंशकथनस्य वा किं प्रयोजनम् ? यदि अवश्यं कुलं मया वक्तव्यं तर्हि श्रृणोतु - अहं चन्द्रवंशस्य एकः बालकः'' इति ।

पुनः दमयन्ती उक्तवती - ''दिक्पालकाः मानवानाम् अस्माकं पूजाम् अर्हन्ति । ते तु पूज्याः । ते न वरणीयाः'' इति ।

तन्मध्ये दमयन्त्याः सखी - ''दमयन्ती नलमहाराजं विहाय अन्यं मनसा अपि न चिन्तयति । मनसा अन्यस्य चिन्तनमपि पातिव्रत्यभङ्गकारणम् इति तस्याः भावः'' इति उक्तवती ।

एवं संवादः प्रवृत्तः । अन्ते दमयन्ती नलं प्रार्थयति - ''महानुभाव ! भवान् एव दिक्पालकान् प्रार्थयतु । नलः एव मम पतिः भवतु, नान्यः'' इति । तथापि नलः - ''दिक्पालाः एव वरणीयाः'' इति पुनः सूचितवान् ।

एवं यदा नलेन निर्बन्धः कृतः तदा बहु दुःखिता दमयन्ती रुदितवती । यदा दमयन्ती रोदनं कृतवती, तदा नलस्य अन्तरङ्गं द्रुतम्[4] । सः आत्मानं परिचायितवान्[5] ।

दमयन्ती अनन्यभावेन - ''त्वम् एव शरणम्'' इति पुनः प्रार्थितवती । ''दिक्पालैः सह स्वयंवरार्थं भवान् अपि आगच्छतु'' इति स्वाभिप्रायं निवेदितवती सा ।

प्रश्नाः

१. दमयन्त्याः समीपं के के दूतीं प्रेषितवन्तः ?

२. यदि दमयन्ती इन्द्रं वृणुयात् तर्हि का याता भवेत् ?

३. दिक्पालाः किमर्थं वरणार्हाः न ?

४. नलः कदा आत्मानं परिचायितवान् ?

---

4. Melted (with pity or mercy), 5. Introduced.

५. श्लोकेषु अन्वयक्रमः

१६. निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥

पदविभागः

निशम्य[1], देवानुचरस्य[2], वाचम्[3], मनुष्यदेवः[4], पुनः[5], अपि[6], उवाच[7], धेन्वा[8], तदध्यासितकातराक्ष्या[9], निरीक्ष्यमाणः[10], सुतराम्[11], दयालुः[12] ।

अन्वयः

देवानुचरस्य वाचं निशम्य मनुष्यदेवः तदध्यासितकातराक्ष्या धेन्वा निरीक्ष्यमाणः सुतरां दयालुः (सन्) पुनरपि उवाच ।

प्रतिपदार्थः

निशम्य = After listening, वाचम् = to the words, देवानुचरस्य = of the attendant of God (Shiva), मनुष्यदेवः = the king (who is like god to people), निरीक्ष्यमाणः = being looked at, धेन्वा = by the cow; तदध्यासितकातराक्ष्या = whose eyes were tremulous due to fear as she was attacked by the lion, सुतराम् दयालुः(सन्) = felt very compassionate, उवाच = (and) spoke, पुनरपि - once again.

तात्पर्यम्

सिंहस्य वचनं राजा श्रुतवान् । तदा सिंहेन आक्रान्ता धेनुः भीता आसीत् । सा दिलीपं दैन्येन अपश्यत् । ततः नृपः अतीव दयालुः अभवत् । अतः पुनरपि सिंहम् उद्दिश्य उक्तवान् ।

अन्वयरचना

उवाच - उक्तवान् - *क्रियापदम्*

कः उवाच ? - मनुष्यदेवः

कीदृशः सन् ? - दयालुः (सन्)

कथं भूतः दयालुः (सन्) ? - सुतराम्

पुनः कीदृशः सन् ? - निरीक्ष्यमाणः

कया निरीक्ष्यमाणः ? - धेन्वा

कीदृश्या धेन्वा ? - तदध्यासितकातराक्ष्या

किं कृत्वा उवाच ? - निशम्य
कां निशम्य ? - वाचम्
कस्य वाचम् ? - देवानुचरस्य
कथम् उवाच ? - पुनरपि

विशेषः

अ) पदविवरणम्

1. अव्ययम् (प्र) 'निशम्य' (नि + शम् + ल्यप्)
2. अ. 'देवानुचर'शब्दः, पु. ष.वि. ए.व.
3. च. 'वाच्'शब्दः, स्त्री. द्वि.वि. ए.व.
4. अ. 'मनुष्यदेव'शब्दः, पु. प्र.वि. ए.व.
5. अव्ययम् 'पुनः'
6. अव्ययम् 'अपि'
7. 'वच्'धातुः भूतकालः(लिट्) प.प. प्र.पु. ए.व.
8. उ. 'धेनु'शब्दः, स्त्री. तृ.वि. ए.व.
9. ई. 'तदध्यासितकातराक्षी'शब्दः, स्त्री. तृ.वि. ए.व.
10. अ. 'निरीक्ष्यमाण'शब्दः, पु. प्र.वि. ए.व.
11. अव्ययम् 'सुतराम्'
12. उ. 'दयालु'शब्दः, पु. प्र.वि. ए.व.

आ) समासः

१. देवस्य अनुचरः, तस्य - *षष्ठीतत्पुरुषः*
२. मनुष्याणां देवः - मनुष्यदेवः - *षष्ठीतत्पुरुषः*
३. तेन अध्यासितम् - तदध्यासितम् - *तृतीयातत्पुरुषः*
तदध्यासितेन कातरे - तदध्यासितकातरे - *तृतीयातत्पुरुषः*
तदध्यासितकातरे अक्षिणी यस्याः सा - तदध्या.. कातराक्षी, तया - *बहुव्रीहिः*

१७. सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥

पदविभागः

सा[1], इयम्[2], स्वदेहार्पणनिष्क्रयेण[3], न्याय्या[4], मया[5], मोचयितुम्[6], भवत्तः[7], न[8], पारणा[9], स्यात्[10], विहता[11], तव[12], एवम्[13], भवेत्[14], अलुप्तः[15], च[16], मुनेः[17], क्रियार्थः[18] ।

अन्वयः

मया स्वदेहार्पणनिष्क्रयेण सा इयं भवत्तः मोचयितुं न्याय्या । एवं तव पारणा विहता न स्यात् । मुनेः क्रियार्थः च अलुप्तः भवेत् ।

अन्वयार्थः

सा इयम् - This cow, न्याय्या - deserves, मोचयितुम् - to be freed, भवत्तः - from you; मया - by me; स्वदेहार्पणनिष्क्रयेण - by offering my body as ransom. एवम् - Thus, तव - your, पारणा - meal, विहता न स्यात् - will not be lost (you will not be deprived of your food), च - as also, मुनेः क्रियार्थः - the sage's rites, अलुप्तः भवेत् - will not be destroyed.

तात्पर्यम्

"हे सिंह ! अहं मम शरीरं समर्पयामि । त्वं माम् आहाररूपेण स्वीकुरु । इमां धेनुं परित्यज । यद्येवं भवति तर्हि त्वया आहारोऽपि लब्धः भवेत् । मुनेः होमसाधनं धेनुरपि रक्षिता भवेत् । अतः मां स्वीकृत्य गां परित्यज" इति दिलीपः धेनुम् उक्तवान् ।

अन्वयरचना

(भवति - *क्रियापदम्*)
का भवति ? - इयं भवति
कीदृशी इयम् ? - सा इयम्
पुनः कीदृशी ? - न्याय्या
किं कर्तुम् ? - मोचयितुम्
कस्मात् मोचयितुम् ? - भवत्तः

केन मोचयितुम् ? - मया
पुनः केन मोचयितुम् ? - स्वदेहार्पणनिष्क्रयेण
　　न स्यात् - न भवेत्
　　का न स्यात् ? - पारणा
　　कीदृशी न स्यात् ? - विहता
　　कस्य पारणा ? - तव
　　कथं न स्यात् ? - एवम्
भवेत्
कः भवेत् ? - क्रियार्थः
कस्य क्रियार्थः ? - मुनेः
कीदृशः भवेत् ? - अलुप्तः

विशेषः

अ). पदविवरणम्

1. द. 'तद्'शब्दः, स्त्री. प्र.वि. ए.व.
2. म. 'इदम्'शब्दः, स्त्री. प्र.वि. ए.व.
3. अ. 'स्व...निष्क्रय'शब्दः, पु. तृ.वि. ए.व.
4. आ. 'न्याय्या'शब्दः, स्त्री. प्र.वि. ए.व.
5. द. 'अस्मद्'शब्दः, त्रि. तृ.वि. ए.व.
6. अव्ययम् (प्र) - 'मोचयितुम्' ('मुच्'धातुः + तुमुन्)
7. अव्ययम् (प्र) - 'भवत्तः' (भवत् + 'तस्'प्रत्ययः)
8. अव्ययम् - 'न'
9. आ. 'पारणा'शब्दः, स्त्री. प्र.वि. ए.व.
10. 'अस्'धातुः प.प. सम्भावना (लिङ्), प्र.पु. ए.व.
11. आ. 'विहता'शब्दः, स्त्री. प्र.वि. ए.व.
12. द. 'युष्मद्'शब्दः, त्रि. ष.वि. ए.व.
13. अव्ययम् 'एवम्'
14. 'भू'धातुः प.प. सम्भावना (लिङ्), प्र.पु. ए.व.
15. अ. 'अलुप्त'शब्दः, पु. प्र.वि. ए.व.
16. अव्ययम् - 'च'

17. इ. 'मुनि'शब्दः, पु. ष.वि. ए.व.
18. अ. 'क्रियार्थ'शब्दः, पु. प्र.वि. ए.व.

आ) समासः

१. स्वस्य देहः - स्वदेहः - *षष्ठीतत्पुरुषः*
स्वदेहस्य अर्पणम् - *षष्ठीतत्पुरुषः*
स्वदेहार्पणम् एव निष्क्रयः, तेन - स्वदेहार्पणनिष्क्रयेण - *कर्मधारयः*
२. क्रियायाः अर्थः क्रियार्थः - *षष्ठीतत्पुरुषः*

१७. तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ।।

पदविभागः

तथा[1], इति[2], गाम्[3], उक्तवते[4], दिलीपः[5], सद्यः[6], प्रतिष्टम्भविमुक्त-बाहुः[7], सः[8], न्यस्तशस्त्रः[9], हरये[10], स्वदेहम्[11], उपानयत्[12], पिण्डम्[13], इव[14], आमिषस्य[15] ।

अन्वयः

तथा इति गाम् उक्तवते हरये सद्यः प्रतिष्टम्भविमुक्तबाहुः सः न्यस्तशस्त्रः (सन्) स्वदेहम् आमिषस्य पिण्डम् इव उपानयत् ।

अन्वयार्थः

हरये - To the lion, उक्तवते - which spoke, गाम् - the words, 'तथा' इति - "so be it", सः - he (Dilipa), प्रतिष्टम्भविमुक्तबाहुः - whose arms were freed from the resistance, सद्यः - all of a sudden, न्यस्तशस्त्रः - having laid down his weapons, उपानयत् - offered, स्वदेहम् - his body, पिण्डम् इव - like(offering) a lump, आमिषस्य = of flesh.

तात्पर्यम्

दिलीपस्य वचनं श्रुत्वा सिंहः 'तथास्तु' इति अकथयत् । तत्क्षणे एव दिलीपस्य बाहुबन्धः शिथिलः अभवत् । दिलीपः स्वकीयं शस्त्रम् अधः स्थापयित्वा स्वस्य शरीरं सिंहाय समर्पितवान् । समर्पणसमये सः शरीरं केवलं मांसपिण्डमिति विचिन्त्य निर्ममबुद्ध्या अर्पणं कृतवान् ।

अन्वयरचना

उपानयत् - समर्पितवान् - *क्रियापदम्*
कः उपानयत् ? - सः दिलीपः
कीदृशः सः ? - न्यस्तशस्त्रः
पुनः कीदृशः ? - प्रतिष्टम्भविमुक्तबाहुः
कदा प्रतिष्टम्भविमुक्तबाहुः ? - सद्यः
कम् उपानयत् ? - स्वदेहम्
किम् इव उपानयत् ? - पिण्डम् इव
कस्य पिण्डम् ? - आमिषस्य
कस्मै उपानयत् ? - हरये
कीदृशाय हरये ? - उक्तवते
काम् उक्तवते ? - गाम्
कीदृशीं गाम् ? - तथा इति

विशेषः

अ) पदविवरणम्

1. अव्ययम् 'तथा'
2. अव्ययम् 'इति'
3. ओ. 'गो'शब्दः, स्त्री. द्वि.वि. ए.व.
4. त. 'उक्तवत्'शब्दः, पु. च.वि. ए.व.
5. अ. 'दिलीप'शब्दः, पु. प्र.वि. ए.व.
6. अव्ययम् 'सद्यः'
7. उ. 'प्रतिष्टम्भः....बाहु'शब्दः, पु. प्र.वि. ए.व.
8. द. 'तद्'शब्दः, पु. प्र.वि. ए,व.
9. अ. 'न्यस्तशस्त्र'शब्दः, पु. प्र.वि. ए.व.
10. इ. 'हरि'शब्दः, पु. च.वि. ए.व.
11. अ. 'स्वदेह'शब्दः, पु. द्वि.वि. ए.व.
12. 'उप'-उपसर्गपूर्वकः 'नी'धातुः, प.प. भूतकालः(लङ्), प्र.पु. ए.व.
13. अ. 'पिण्ड'शब्दः, न. द्वि.वि. ए.व.
14. अव्ययम् 'इव'
15. अ. 'आमिष'शब्दः न. ष.वि. ए.व.

आ) समासः

१. प्रतिष्टम्भात् विमुक्तः - प्रतिष्टम्भविमुक्तः- *पञ्चमीतत्पुरुषः*
   प्रतिष्टम्भविमुक्तः बाहुः यस्य सः - *बहुव्रीहिः*

२. न्यस्तं शस्त्रं येन सः - *बहुव्रीहिः*

३. स्वस्य देहः स्वदेहः, तम् - *षष्ठीतत्पुरुषः*

६. संस्कृतसाहित्यपरिचयः

नीतिकाव्यानि स्तोत्रकाव्यानि च

नीतिकाव्यानि

'इह लोके जातः मनुष्यः सन्मार्गेण गच्छन् सत्कार्याणि कुर्वन् जीवनं यापयेत् । अन्ते च मोक्षं प्राप्नुयात्' इति अस्माकं पूर्वजानाम् उदात्तं चिन्तनम् आसीत् । अतः जनान् सन्मार्गे प्रेरयितुं, प्रवर्तयितुं च नीतिबोधनम् आवश्यकम् अभवत् । तदर्थं नीतिबोधिकाः कथाः आख्यानानि च काव्यस्य अङ्गत्वेन कविभिः निबद्धानि । (ऋग्वेदादिवैदिकसाहित्ये अपि नीतिबोधः उपलभ्यते ।) प्राचीनैः आलङ्कारिकैः नीतेः उपदेशः अपि काव्यस्य प्रयोजनेषु अन्यतमम् इति अङ्गीकृतम् । एवं जनोपदेशार्थं काव्ये प्रासङ्गिकतया निबद्ध्यमानः नीतिबोधः अनन्तरकाले पृथक् काव्यभेदत्वमेव प्राप्नोत् । उपदेशात्मकानि नीतिकाव्यानि एव बहूनि रचितानि ।

शान्तिः, वैराग्यं, सुखं, दुःखं, पुण्यं, पापं, धर्मः, अधर्मः इत्यादीनां द्वन्द्वानां विवेचनम्, अध्यात्मचिन्तनं, परोपकारादीनां सद्गुणानां प्रशंसा, महात्मनां स्वभाववर्णनम् इत्यादयः विषयाः नीतिकाव्येषु उपवर्णिताः भवन्ति ।

नीतिकाव्येषु निबद्धाः श्लोकाः कदाचित् परस्परं सम्बन्धरहिताः सन्तः अपि मुक्तकानि इति प्रत्येकं पृथक् काव्यत्वं प्राप्नुवन्ति । नीतिबोधनमपि कदाचित् विधिरूपेण, निषेधरूपेण, निन्दारूपेण, प्रशंसारूपेण वा भवितुम् अर्हति ।

कानिचित् प्रसिद्धानि नीतिकाव्यानि

चाणक्यनीतिः

नीतिशतकम् } - भर्तृहरिः
वैराग्यशतकम् }

भल्लटशतकम्	-	भल्लटः
शान्तिशतकम्	-	बिल्हणः
शतश्लोकी मोहमुद्गरः चर्पटपञ्जरिका	-	शङ्कराचार्यः

स्तोत्रकाव्यानि

भगवन्तं सर्वशक्तं मन्यमानाः वयं भारतीयाः तं प्रसादयितुं तस्य अनुग्रहं प्राप्तुं च नानाप्रकारैः तस्य स्तवनं कुर्मः । प्राचीनकालात् पूर्वजैः ये ये देवाः कल्पिताः, तान् देवान् मनसि निधाय कवयः बहूनि स्तोत्राणि रचितवन्तः । ऋक्संहिता स्तोत्रात्मिका एव अस्ति । ततः स्तोत्रसाहित्यस्य आरम्भः जातः इति वक्तुं शक्यते ।

सर्वेषु अपि काव्येषु आरम्भे मङ्गलाचरणावसरे प्रायः कवयः स्तोत्रं लिखन्ति एव । कालिदासः, माघः, भारविः इत्यादीनां कवीनां काव्येषु अपि स्तोत्राणि सन्ति एव । तानि च स्तोत्राणि काव्यगुणयुक्तानि अपि इति कारणतः अत्यन्तं रमणीयानि सन्ति ।

शतकानि, अष्टोत्तरशतनामानि, सहस्रनामादीनि च स्तोत्रकाव्यस्य एव विभिन्नानि रूपाणि ।

शङ्कराचार्यैः विरचितं स्तोत्रसाहित्यं तु समग्रे देशे सुविख्यातम् अस्ति । तस्य काव्यसौन्दर्यं, भावप्रकर्षः च कस्य वा हृदयं न आवर्जयेत् ? शारदा, लक्ष्मीः, भवानी, अन्नपूर्णा, विष्णुः, कृष्णः, शिवः, कालभैरवः इत्यादीन् सर्वान् अपि देवान् उद्दिश्य तैः लिखितानि स्तोत्राणि अद्यापि गृहे गृहे विलसन्ति ।

कानिचित् प्रसिद्धानि स्तोत्रकाव्यानि

चण्डीशतकम्	-	बाणः
सूर्यशतकम्	-	मयूरः
स्तोत्ररत्नम्	-	यामुनाचार्यः
लक्ष्मीसहस्रम्	-	वेङ्कटाध्वरिः
वरदराजस्तवः	-	अप्पय्यदीक्षितः
भजगोविन्दम् इत्यादीनि	-	शङ्कराचार्यः
मुकुन्दमाला	-	कुलशेखरः

करुणालहरी, गङ्गालहरी, अमृतलहरी, लक्ष्मीलहरी, सुधालहरी	-	जगन्नाथः
पादुकासहस्रम्, दयाशतकम् इत्यादीनि	-	वेङ्कटनाथः

७. संस्कृतग्रन्थकारपरिचयः

कथाकाराः

क्षेमेन्द्रः

बृहत्कथामञ्जर्याः रचयिता क्षेमेन्द्रः । गुणाढ्यः नाम कविः भूत-भाषया 'बृहत्कथा'नामकं कथाग्रन्थं रचितवान् आसीत् । तम् एव क्षेमेन्द्रः बृहत्कथामञ्जर्यां सङ्गृहीतवान् अस्ति । मूलोक्तकथां यथावत् रक्षन् क्षेमेन्द्रः बृहत्कथां सङ्गृहीतवान् इत्यतः एषः ग्रन्थः क्वचित् शुष्कः इव भासते । किन्तु क्षेमेन्द्रस्य भाषा न कठिना । मधुरा सरला सुबोधा च सा । बृहत्कथा इदानीं न उपलभ्यते इत्यतः क्षेमेन्द्रस्य बृहत्कथामञ्जरीद्वारा एव बृहत्कथायाः स्वरूपम् ऊह्यते अस्माभिः ।

क्षेमेन्द्रेण रामायणकथामञ्जरी, भारतमञ्जरी चेति ग्रन्थद्वयम् अपि लिखितम् । तयोः ग्रन्थयोः नाम्ना एव ज्ञायते यत् तौ रामायणभारतयोः सङ्ग्रहरूपौ इति । बृहत्कथामञ्जर्याः रचना १०६३ तमे क्रिस्ताब्दे आरब्धा, १०६६ तमे क्रिस्ताब्दे समाप्तिं गता च इति ज्ञायते । अतः एतत् तु निश्चितं यत् क्षेमेन्द्रः एकादशे शतके आसीत् इति । एषः काश्मीरराजस्य अनन्तस्य आस्थाने आसीत् । एतस्य पिता प्रकाशेन्द्रः ।

सोमदेवः

बृहत्कथा क्षेमेन्द्रेण यथा बृहत्कथामञ्जर्यां सङ्गृहीता तथैव सोमदेवेन अपि कथासरित्सागरे सङ्गृहीता । सोमदेवः अपि क्षेमेन्द्रः इव काश्मीरराजस्य अनन्तस्य आस्थाने, एकादशे शतके च आसीत् । अनन्तराजस्य खिन्नायाः पत्न्याः सूर्यवत्याः मनोविनोदार्थं सः कथासरित्सागरं रचितवान् इति श्रूयते । सोमदेवस्य पिता रामदेवः ।

सोमदेवस्य कथासरित्सागरे दीर्घाः समासाः कठिनानि पदानि च न्यूनानि । अतः कथासु सरलता विशेषतः दृश्यते । बृहत्कथामञ्जर्याम् अदृश्यमानाः

बह्व्यः बृहत्कथाग्रन्थस्थाः कथाः कथासरित्सागरे दृश्यन्ते । कथासरित्सागरे स्थिताः कथाः काश्चन लघ्व्यः, पुनः काश्चन दीर्घाः । विविधजनसम्बद्धाः विभिन्नदेशसम्बद्धाः च कथाः भवन्ति अत्र । कथानिरूपणे सोमदेवस्य अनुपमं सामर्थ्यम् । भारतीयं साहित्यं यथा रामायणं महाभारतं च अवलम्बते तथैव कथासरित्सागरम् अपि अवलम्बते । कथासरित्सागरः विविधाभिः भाषाभिः अनूदितः अपि ।

विष्णुशर्मा

'पञ्चतन्त्रम्' इत्यस्य कथाग्रन्थस्य नाम यः न श्रुतवान् तादृशः प्रायः कोऽपि नास्ति । तादृशस्य अतिप्रसिद्धस्य पञ्चतन्त्रस्य रचयिता विष्णुशर्मा । महिलारोप्यस्य राज्ञः अमरशक्तेः त्रीन् पुत्रान् षड्भिः मासैः राजनीतिनिपुणान् कर्तुं विष्णुशर्मा पञ्चतन्त्रग्रन्थं रचितवान् इति श्रूयते । विष्णुशर्मा तृतीये शतके ततः पूर्वं वा आसीत् इति पण्डिताः अभिप्रयन्ति । विष्णुशर्मा काश्मीरदेशीयः ।

पञ्चतन्त्रे गद्यं पद्यं चापि अस्ति । प्रायः कथाभागं निरूपयति गद्यम् । पद्यं च नीतिं निरूपयति । एतस्मिन् पञ्च तन्त्राणि सन्ति । प्रतितन्त्रम् एका प्रधानकथा भवति । नीतिबोधनार्थं पुनः तत्र बह्व्यः उपकथाः भवन्ति । पञ्चतन्त्रस्य शैली अतीव सरला । कासुचित् कथासु लघुहास्यम् अपि दृश्यते । भारतीयसंस्कृतिः सर्वासु कथासु स्फुटतया दृश्यते ।

पञ्चतन्त्रग्रन्थेन विश्वपर्यटनम् एव कृतम् इति वक्तुं शक्यते । एतस्य ५० भाषाभिः रचितानि २०० रूपान्तराणि हर्टेल्नामकः जर्मन्पण्डितः उल्लिखित-वान् अस्ति ।

नारायणभट्टः

'हितोपदेशः' पञ्चतन्त्रस्य परिष्कृता काचित् आवृत्तिः चेदपि स्वतन्त्र-ग्रन्थत्वेन एव तस्य ख्यातिः अस्ति । तस्य हितोपदेशस्य रचयिता नारायण-भट्टः । एषः बङ्गालदेशीयः । एषः धवलचन्द्रस्य आश्रये आसीत् । एतस्य कालः क्रि.श. १० इति पण्डिताः अभिप्रयन्ति । यद्यपि पञ्चतन्त्रस्य आधारेण एषः ग्रन्थः रचितः, तथापि अन्यग्रन्थेभ्यः अपि अत्र कथाः स्वीकृताः । महाभारतात् स्वीकृता मुनिमूषककथा, वेतालपञ्चविंशतितः स्वीकृता वीरवरकथा इत्यादीनि अत्र उदाहरणानि । हितोपदेशस्य भाषा अतीव सरला । संस्कृतभाषाबोधनं नीतिबोधनं च एतस्य लक्ष्यम् इति कविः स्वयम् उक्तवान् अस्ति । संस्कृताभ्यासिनः सर्वे प्रायः एतं ग्रन्थं पठन्ति एव ।

कोविदः - अष्टमः पाठः

प्रश्नाः

I. *अधोनिर्दिष्टानां पदानां विग्रहवाक्यानि लिखत ।*

१. उत्तमजनसहवासः

(अ) ....

(आ) ....

२. रमाकान्तभक्तः

(अ) ....

(आ) ....

३. नीलकण्ठसेवासन्तृप्तः

(अ) ....

(आ) ....

(इ) ....

II. *अधोनिर्दिष्टे पद्ये गुरु-लघुचिह्नानि अङ्कयत ।*

आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ।।

III. *उत्तरयत ।*

१. विष्णुशर्मा पञ्चतन्त्रग्रन्थं किमर्थं रचितवान् ?

२. बृहत्कथा कया भाषया लिखिता ?

३. क्षेमेन्द्रः कं ग्रन्थं रचितवान् ?

४. शोकदग्धस्य औषधं किम् ?

५. कार्यस्य आरम्भे कैः सह समालोचनीयम् ?

(**Note:** Answers for the above exercises are given in the end of this book. (PNO - 263) After completing them, check your answers.)

कोविदः - नवमः पाठः

।। उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।।

One should lift oneself by one's own efforts and should not degrade oneself.

१. समासः

In the previous lessons, we learnt how two or more words are compounded to form a single word. A compound can be formed in another way also. Two compound words can be compounded to form a long compound.

Observe the following example -

कर्णाटकराज्यमुख्यमन्त्री = Chief minister of Karnataka State. The compound is dissolved thus. It consists of two component compounds - 'कर्णाटकराज्यम्' and 'मुख्यमन्त्री'

These inturn are dissolved as कर्णाटकम् इति राज्यम् and मुख्यश्चासौ मन्त्री च । When the two compound words are compounded to form a genitive Tatpurusha the single word formed is कर्णाटकराज्यमुख्यमन्त्री ।

Study the following examples.

१. प्रथमकक्ष्यापाठ्यपुस्तकम् - Text book for first standard.

विग्रहवाक्यम् -

२. केरलराज्यमुख्यमन्त्री - Chief minister of the State of Kerala.

केरलम् इति राज्यम् - केरलराज्यम् - *सम्भावनापूर्वपदः कर्मधारयः*	मुख्यश्चासौ मन्त्री च मुख्यमन्त्री - *विशेषणपूर्वपदः कर्मधारयः*

केरलराज्यस्य मुख्यमन्त्री - केरलराज्यमुख्यमन्त्री - *षष्ठीतत्पुरुषः*

३. **कर्णाटकराज्यविद्यासचिवः** - Education minister of the State of Karnataka.

कर्णाटकम् इति राज्यम् - कर्णाटकराज्यम् - *सम्भावनापूर्वपदः कर्मधारयः*	विद्यायाः सचिवः - विद्यासचिवः - *षष्ठीतत्पुरुषः*

कर्णाटकराज्यस्य विद्यासचिवः - कर्णाटक...सचिवः - *षष्ठीतत्पुरुषः*

४. **संस्कृतसाहित्यश्रेष्ठकृतयः** - The great works of Samskrit literature

संस्कृतस्य साहित्यम् - संस्कृतसाहित्यम् - *षष्ठीतत्पुरुषः*	श्रेष्ठाः कृतयः - श्रेष्ठकृतयः - *विशेषणपूर्वपदः कर्मधारयः*

संस्कृतसाहित्यस्य श्रेष्ठकृतयः - संस्कृत...कृतयः - *षष्ठीतत्पुरुषः*

५. **कालिदासबाणादिकविश्रेष्ठाः** - Great Poets like Kalidasa Bana etc.,

कालिदासः च बाणः च - कालिदासबाणौ - *द्वन्द्वसमासः* ⇨	कालिदासबाणौ आदिः येषां ते - कालिदास-बाणादयः - *बहुव्रीहिः*	कविषु श्रेष्ठाः - कविश्रेष्ठाः - *सप्तमीतत्पुरुषः*

कालिदासबाणादयः कविश्रेष्ठाः - कालिदास...श्रेष्ठाः - *कर्मधारयः*

Thus compound words are compounded with other compound words. Such a compound word may again be compounded with yet another word to form a lenghthier compound.

उदा - १. नाकाधिपसभाभवनमध्यम् - Central portion of the assembly hall of the Lord of heavens.

नाकस्य अधिपः - नाकाधिपः - *षष्ठीतत्पुरुषः*

सभायाः भवनम् - सभाभवनम् - *षष्ठीतत्पुरुषः*

नाकाधिपस्य सभाभवनम् - नाका...नम् - *षष्ठीतत्पुरुषः*

नाकाधिप..भवनस्य मध्यम् - नाकाधिप..मध्यम् - *षष्ठीतत्पुरुषः*

Here the compound नाका....भवनम् is compounded with the word मध्यम्.

२. कृतदण्डकारण्यपुण्यवासः - One who has led sacred life in the Dandaka forest.

दण्डकम् इति अरण्यम् - दण्डकारण्यम् - *सम्भावनापूर्वपदः क. धा.*

पुण्यः वासः - पुण्यवासः - *विशेषणपूर्वपदः कर्मधारयः*

दण्डकारण्यस्य पुण्यवासः - दण्डकारण्य..वासः - *षष्ठीतत्पुरुषः*

कृतः दण्डकारण्य..वासः येन सः - कृत...वासः - *बहुव्रीहिः*

Here the word कृत is compounded with दण्डकारण्यपुण्यवासः which itself is another compound word.

Thus while dissolving a समस्तपदम् you must keep in mind the meaning of the total word and proceed step by step by choosing the two proper words to begin with.

२. विशेषविषयाः

छन्दः - २

In the previous lesson you learnt about गुरु, लघु and गणाः. Now you will learn about prosody - the metrical arrangement of syllables in poetry.

There are two types of metres namely -

1. वर्णच्छन्दः and 2. मात्राच्छन्दः । 'मात्रा' is the time required for

uttering a syllable. ह्रस्व needs one मात्रा and दीर्घ, two. Those metres where the number of the matras is taken into account, are classified under मात्राच्छन्दः । In these metres there are no गणाः that you learnt about earlier.

In this lesson you will get acquainted with वर्णच्छन्दः where the syllables are grouped into various गणाः taught earlier. Verses belonging to Varna chandas have four Padas or quarters. Generally all quarters of a verse have equal number of syllables. The last letter of each pada is always regarded as a guru even if it is a ह्रस्व ।

Some metres belonging to Varna Chandas

१. अनुष्टुप्

This metre is very common in Samskrit literature. Most of the works like Ramayana, Mahabharatha etc are composed in this metre only. It has four padas of eight syallables each. The fifth syllable of each pada is laghu and the sixth is guru. The seventh syllable of the 2nd and the 4th pada, is laghu and of the 1st and the 3rd pada, is guru.

Here is the definition as well as the example of this metre.

लक्षणम् - श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्वितीयतुर्ययोर्ह्रस्वं सप्तमं गुरु चान्ययोः ।।

The verse gives the definition of the Anushtup metre. The definition can be applied to the very verse.

गु, घु, र्य, रु - are laghu. (These are the 5th syllables)

रु, प, यो, चा - are guru. (Thses are the 6th syllables)

ञ्च, न्य - are laghu. (the 7th syllable of 2nd & 4th Pada)

ज्ञे, र्ह्र - are guru. (the 7th syllable 1st & 3rd Pada)

२. वसन्ततिलकावृत्तम्

लक्षणम् - *उक्ता वसन्ततिलका तभजा जगौ गः ।*

Each pada has त, भ, ज and ज Ganas and two long syllables at the end.

Application - उ क्ता व स न्त ति ल का त भ जा ज गौ गः
तगण भगण जगण जगण 2 gurus

Observe - केऽ पि स्म र न्त्य नु स र न्ति च के चि द न्ये ॥

३. इन्द्रवज्रावृत्तम्

लक्षणम् - ***स्यादिन्द्रवज्रा यदि तौ जगौ गः*** ।

A श्लोक that has eleven syllables in each pada containing the ganas त, त, ज and two guru syllables in the end, is in इन्द्रवज्रा वृत्तम् ।

समन्वयः - स्या दि न्द्र व ज्रा य दि तौ ज गौ गः ।
तगण तगण जगण 2 gurus
जा या प्र ति ग्रा हि त ग न्ध मा ल्याम्

४. उपेन्द्रवज्रावृत्तम्

लक्षणम् - उपेन्द्रवज्रा जतजास्ततो गौ ।

जगण, तगण, जगण and two gurus make up उपेन्द्रवज्रा वृत्त । This metre also has eleven syllables.

समन्वयः - उ पे न्द्र व ज्रा ज त जा स्त तो गौ
जगण तगण जगण 2 gurus
अ थ प्र जा ना म धि पः प्र भाते

५. उपजातिवृत्तम्

Eg. अ थ प्र जा ना म धि पः प्र भा ते
जगण तगण जगण 2 gurus

Eg. जा या प्र ति ग्रा हि त ग न्ध मा ल्याम्
तगण तगण जगण 2 gurus

This is the first half (two padas)of a sloka of Raghuvamsha.

The first pada is in उपेन्द्रवज्रावृत्त (जगण, तगण, जगण and two gurus) and the second pada is in इन्द्रवज्रावृत्त (तगण, तगण, जगण and two gurus). A combination of उपेन्द्रवज्रा and इन्द्रवज्रा like the above is called उपजातिवृत्त ।

अभ्यासः

I. *अधोलिखितानां समस्तपदानां विग्रहवाक्यं समासनाम च लिखत ।*

१. दशमकक्ष्यात्रैमासिकपरीक्षा -

२. मुख्यमन्त्रिकार्यालयः -

३. विद्यालयक्रीडाङ्गणम् -

II. *गुरुलघुचिह्नानि अङ्कयित्वा गणं च निर्दिशत ।*

१. ... . | ... ...
द श र | थ पु त्रः
.... | ....

२. ... ... | ... ...
भू ष णा | ल ङ्कृ ता
.... | ....

३. ... ... | ... ... | ... ...
स र्व स | ङ्ग प रि | त्या गि नः
.... | .... | ....

४. ... ...
स भा प ति स्था नम्

....

५. ... ...
स मा ज से व कः

....

६. ... ...
पु स्त क प्रे ष ण व्य व स्था

....

७. ... ...
स म्भा ष ण प त्रि का याः का र्या ल यः

....

८. ... ...
प त्रा ल य द्वा रा सं स्कृ त शि क्ष णम्

....

३. *अधोलिखितेषु गुरुलघुचिह्नानि अङ्कयित्वा, गणनाम निर्दिश्य छन्दसः नाम अपि लिखत ।*

.. ..
१. प रो प का रा य फ ल न्ति वृ क्षाः ।

.... – ....

.. ..
२. पू ज्या स म स्त ध र णी म नु जैः स दा पि ।

.... – ....

.. ..
३. का ये न वा चा म न से न्द्रि यै र्वा ।

.... – ....

.. ..
४. भू या त्स मे षां स क ले ष्ट सि द्धिः ।

.... – ....

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 264) After completing the exercises check your answers.)

३. सुभाषितानि

१७. मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ ।।

- रघुवंशम् - ८.८७

पदविभागः -

मरणम्, प्रकृतिः, शरीरिणाम्, विकृतिः, जीवितम्, उच्यते, बुधैः, क्षणम्, अपि, अवतिष्ठते, श्वसन्, यदि, जन्तुः, ननु, लाभवान्, असौ ।

अन्वयः

शरीरिणां मरणं प्रकृतिः, जीवितं विकृतिः (इति) बुधैः उच्यते । अतः यदि जन्तुः क्षणम् अपि श्वसन् अवतिष्ठते तर्हि असौ ननु लाभवान् (भवति) ।

अन्वयार्थः

शरीरिणां = देहिनां, मरणं = निधनम्, प्रकृतिः = स्वभावः - निश्चितम्, जीवितं = जीवनम्, विकृतिः = विकारः - आगन्तुकम्, इति, बुधैः = पण्डितैः, उच्यते = कथ्यते । अतः, यदि, जन्तुः = प्राणी, क्षणमपि = क्षणकालमपि, श्वसन् = जीवन्, अवतिष्ठते = वसति, तदा, असौ = एषः - क्षणजीवी, ननु = निश्चयेन, लाभवान् = महालाभयुक्तः, भवति ।

तात्पर्यम्

सर्वेषां प्राणिनां मरणं स्वभावसिद्धम् । तत् परिहर्तुं केनापि न शक्यते । जातस्य मरणं निश्चितम् एव । किन्तु जीवनं न निश्चितम् । तत् आकस्मिकं, न तु स्वभावसिद्धम् । अद्यैव जीवनं समाप्तं स्यात्, अथवा श्वः । जीवितस्य पुरुषस्य मरणं भवत्येव । किन्तु मृतस्य पुनः जीवितं भविष्यति इत्यत्र न निश्चयः । अतः क्षणकालमपि जीवः यदि देहे तिष्ठति तर्हि तदेव प्राणिनां महालाभः । किञ्च, मरणेऽपि शोकः न कार्यः । यतः मरणं प्राणिनां स्वाभाविकम् । यावज्जीवं सन्तोषेण जीवेत् । यतः दुर्लभं जीवनम् अस्माभिः प्राप्तम् अस्ति ।

१८. अनेकशास्त्रं बहु वेदितव्यम्
अल्पश्च कालो बहवश्च विघ्नाः ।

यत्सारभूतं तदुपासितव्यं
हंसो यथा क्षीरमिवाम्बुमध्यात् ।।

पदविभागः

अनेकशास्त्रम्, बहु, वेदितव्यम्, अल्पः, च, कालः, बहवः, च, विघ्नाः, यत्, सारभूतम्, तत्, उपासितव्यम्, हंसः, यथा, क्षीरम्, इव, अम्बुमध्यात् ।

अन्वयः

अनेकशास्त्रम् । बहु वेदितव्यम् । कालश्च अल्पः । विघ्नाः च बहवः । यत् सारभूतं तत् उपासितव्यम्, यथा अम्बुमध्यात् क्षीरम् इव ।

अन्वयार्थः

अनेकशास्त्रं = शास्त्राणि सन्ति बहूनि, बहु = अधिकम्, वेदितव्यं = ज्ञातव्यम् । कालः च = समयः च, अल्पः = न अधिकः, विघ्नाः बहवः = विघ्नकारकाः अंशाः अधिकाः, यत् सारभूतं = यत् सारयुक्तं भवति, तत् उपासितव्यम् = तदेव सेवनीयम् । यथा, हंसः = हंसपक्षी, अम्बुमध्यात् = जलमध्यात्, क्षीरम् इव = क्षीरं स्वीकरोति तथा ।

तात्पर्यम्

जातेन मनुष्येण बहूनां शास्त्राणां विषये यावत् शक्यते तावत् अध्येतव्यम् । तद्विषये विलम्बः न करणीयः । यतः कालः बहु अल्पः । अपि च सत्कार्याणां विघ्नाः अपि बहवः भवन्ति । यथा केनचित् कविना उक्तं - 'क्षणशः विद्यां साधयेत्' इति, तथैव कृत्वा शास्त्राध्ययनसमये अपि सारभूतम्, अतिप्रधानम् एव ज्ञातुम् अधिकः प्रयत्नः करणीयः । जलेन मिश्रितं क्षीरम् एकस्मिन् पात्रे अस्ति चेदपि हंसः यथा क्षीरमेव स्वीकरोति, तथा अध्ययनसमये अनुपयुक्तः अप्रधानः वा भागः परित्यक्तव्यः ।

४. काव्यकथा

दमयन्त्याः पिता भीमराजः पुत्र्याः स्वयंवरं कर्तुं निश्चित्य सन्नाहम् आरब्धवान् । स्वयंवरार्थं नगरात् बहिर्भागे विशालः सभामण्डपः सिद्धः अभवत् । अन्याः अपि व्यवस्थाः सर्वाः कृताः । बहुभ्यः देशेभ्यः अहमहमिकया[1] राजानः स्वयंवरार्थं समागच्छन् । सर्वे अपि राजानः

सभामण्डपम् उपासर्पन्[2]। दिक्पालकाः अपि सभामण्डपं समागताः। एतन्मध्ये महाविष्णुः वैकुण्ठे सरस्वतीम् आहूय उक्तवान् - ''त्वं भूलोकं गच्छ, तत्र दमयन्त्याः स्वयंवरः भविष्यति। तत्र राज्ञां गोत्रप्रवक्त्री[3] भूत्वा कार्यं कुरु'' इति। सरस्वती - 'तथा अस्तु' इति अङ्गीकृत्य बालिकारूपेण भूमिम् अवतीर्णा। सा अपि सभाभवनम् आगतवती।

भीमराजः दुहितरं दमयन्तीम् सभाम् आगत्य वरणमालाम् अर्पयितुम् आकारितवान्[4]। दमयन्ती शिबिकायाम्[5] उपविश्य सभामध्यम् आगतवती। सर्वे राजानः तां सादरं वीक्षितवन्तः। दमयन्ती नलानुरक्ता इति ज्ञात्वा महेन्द्रादयः दिक्पालाः नलवेषम् एव धृतवन्तः आसन्। सर्वे राजानः सभ्याः च सभायाम् उपाविशन्[6]। ततः सरस्वती दमयन्तीम् उद्दिश्य - 'अपेक्षितं वरं वृणीष्व[7]' इति अवोचत्। सा स्वयं राज्ञां गोत्रप्रवाचनम् अपि कृतवती। दमयन्तीस्वयंवरार्थं पुष्कराधीशः हव्यनृपः, क्रौञ्चद्वीपाधिपः, कुशद्वीपाधिपतिः, शाल्मलीद्वीपाधीशः, प्लक्षराजः, मेधातिथिः, गौडदेशाधीशः, मधुरानाथः, काशीराजः, अन्ये च बहवः नृपाः आगताः। एतेषां सर्वेषां गोत्रविवरणं, पराक्रमविवरणं च सरस्वती कृतवती। सा पुनः अपि तत्र उपस्थितान् ऋतुपर्ण-पाण्ड्यनृप-काञ्चीपुराधीश-नेपालनृप-मिथिलाधीश-उत्कलाधीश-मगधाधीशान् अपि अवर्णयत्।

एवं महावर्णनप्रसङ्गे अपि दमयन्ती नलमहाराजम् एव मनसा ध्यायन्ती विचिन्वती[8] च आसीत्। तदा शिबिकावाहकाः[9] दमयन्तीं दिक्पालकानां समीपं नीतवन्तः।

तत्र दिक्पालैः सह नलः अपि आसीत्। सरस्वती दिक्पालान् वर्णयितुम् आरब्धवती। यं यं दिक्पालं सा वर्णितवती, तत् सर्वं नलवर्णनम् इव एव आसीत्। अपि च यदा दमयन्ती दिक्पालान् विलोकितवती, तदा सर्वे दिक्पालाः अपि नलः इव तया अदृश्यन्त[10]। पञ्च अपि उपस्थिताः नलः इव आसन्। सरस्वत्याः वर्णनम् अपि सन्देहजनकम् आसीत्। तेषु कः वरणीयः इति दमयन्ती व्यामुग्धा[11] अभवत्। खिन्ना[12], सन्तप्ता[13] च अभूत्।

---

1. Vying with one another (coming forward with great enthusiasm), 2. approached, 3. one who announces lineage (fem). 4. Sent for (called), 5. In a palanquin, 6. Took their seats (sat), 7. choose (ask for), 8. Searching for, 9. Palanquin bearers, 10. were seen, 11. confused 12. sad, 13. upset

सा प्रत्येकम् यद्यपि अनेकवारं समादरेण वीक्षितवती तथापि तेषु भेदं ज्ञातुम् अशक्ता एव अभवत् ।

ततः सा भक्तिभावेन देवान् प्रार्थयामास – "हे देवाः ! मम मनः नलमहाराजे एव लग्नम् । अतः तमेव वरयितुम् इच्छामि । एतेषु कः वा नलमहाराजः इति ज्ञातुं मां यूयम् अनुगृह्णीत" इति ।

दमयन्त्याः अनन्यप्रीतिं वीक्ष्य सर्वे देवाः सन्तुष्टाः अभवन् । ते वरेण तम् अनुगृहीतवन्तः । तदा देवानाम् आशिषा सरस्वत्याः क्लिष्टकरं वर्णनमपि दयमन्त्या ज्ञातम् । उपस्थितेषु अयम् एव नलः इति नलमहाराजं सा अभिज्ञातवती । महता सम्भ्रमेण सा रोमाञ्चैः सह वरणमालां नलमहाराजस्य कण्ठे संयोजयामास[14] । सर्वे अपि नितान्तं सन्तुष्टाः अभवन् ।

दिक्पालाः दमयन्तीम् उद्दिश्य सान्त्वनवचनानि अब्रुवन् । दमयन्ती नलमहाराजं वृतवती इति अन्ये राजानः क्रुद्धाः अभवन् । दिक्पालेषु अग्निः आत्मानं न प्रकटयामास । सः लज्जापीडितः अभवत् । ततः सरस्वती स्वीयरूपं धृतवती । इन्द्रः नलदमयन्त्योः आशिषम् उक्तवान् । सरस्वती नलमहाराजाय चिन्तामणिमन्त्रं प्रदत्तवती । देवलोकात् पुष्पवृष्टिः अभवत् । इन्द्रादयः देवाः स्वर्गं प्रति प्रस्थिताः । अन्ये च नृपाः अपि स्वनगराणि अगच्छन् । स्वयंवरविधिः वैभवेन समाप्तः अभवत् ।

प्रश्नाः

१. 'भूलोकं गच्छ' इति कः काम् अवदत् ?
२. के नलवेषं धृतवन्तः ?
३. सरस्वत्याः क्लिष्टकरं वर्णनं दमयन्त्या कथम् अवगतम् ?
४. अन्ये राजानः किमर्थं क्रुद्धाः ?
५. सरस्वती नलाय किं दत्तवती ?

५. श्लोकेषु अन्वयक्रमः

१९. तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥

---

14. Placed (put around).

पदविभागः

तस्मिन्[1], क्षणे[2], पालयितुः[3], प्रजानाम्[4], उत्पश्यतः[5] सिंहनिपातम्[6], उग्रम्[7], अवाङ्मुखस्य[8], उपरि[9], पुष्पवृष्टिः[10], पपात[11], विद्याधर-हस्तमुक्ता[12] ।

अन्वयः

तस्मिन् क्षणे उग्रं सिंहनिपातम् उत्पश्यतः अवाङ्मुखस्य प्रजानां पालयितुः उपरि विद्याधरहस्तमुक्ता पुष्पवृष्टिः पपात ।

अन्वयार्थः

तस्मिन्, क्षणे - At that moment, **पपात** - there fell, **पुष्पवृष्टिः** - a shower of flowers, **विद्याधरहस्तमुक्ता** - released by the hands of Vidyadharas, **उपरि** - over, **प्रजानाम् पालयितुः** - the protector of the subjects (Dilipa), **अवाङ्मुखस्य** - whose head was lowered, **उत्पश्यतः** - (and) who was expecting, **उग्रम्** - a fearful, **सिंहनिपातम्** - pounce of the lion (on himself).

तात्पर्यम्

यदा सिंहस्य आक्रमणं निरीक्ष्य राजा दिलीपः अवाङ्मुखः भूत्वा स्थितः आसीत् तदा तस्य शिरसः उपरि विद्याधराः पुष्पवृष्टिम् अमुञ्चन् ।

अन्वयरचना

पपात - पतितम् - *क्रियापदम्*

का पपात ? - पुष्पवृष्टिः

कीदृशी पुष्पवृष्टिः ? - विद्याधरहस्तमुक्ता

कुत्र पपात ? - उपरि

कस्य उपरि ? - पालयितुः

कासां पालयितुः ? - प्रजानाम्

पुनः कस्य ? - अवाङ्मुखस्य

पुनः कीदृशस्य ? - उत्पश्यतः

कम् उत्पश्यतः ? - सिंहनिपातम्

कीदृशं सिंहनिपातम् ? - उग्रम्

कदा पपात ? - क्षणे

कीदृशे क्षणे ? - तस्मिन्

विशेषः

अ. पदविवरणम्

1. द. 'तद्'शब्दः, पु. स.वि. ए.व.
2. अ. 'क्षण'शब्दः, पु. स.वि. ए.व.
3. ऋ. 'पालयितृ'शब्दः, पु. ष.वि. ए.व.
4. आ. 'प्रजा'शब्दः, स्त्री. ष.वि. नित्य ब.व.
5. त. 'उत्पश्यत्'शब्दः, पु. ष.वि. ए.व.
6. अ. 'सिंहनिपात'शब्दः, पु. द्वि.वि. ए.व.
7. अ. 'उग्र'शब्दः, पु. द्वि.वि. ए.व.
8. अ. 'अवाङ्मुख'शब्दः, पु. ष.वि. ए.व.
9. अव्ययम् 'उपरि'
10. इ. 'पुष्पवृष्टि'शब्दः, स्त्री. प्र.वि. ए.व.
11. 'पत्लृ'धातुः प.प. भूत.(लिट्) प्र.पु. ए.व.
12. आ. 'विद्याधरहस्तमुक्ता'शब्दः स्त्री. प्र.वि. ए.व.

आ. समासः

१. सिंहस्य निपातः, तम् - *षष्ठीतत्परुषः*

२. पुष्पाणां वृष्टिः - *षष्ठीतत्पुरुषः*

३. विद्याधराणां हस्ताः - *षष्ठीतत्पुरुषः*

विद्याधरहस्तेभ्यः मुक्ता - *पञ्चमीतत्पुरुषः*

४. अवाक् मुखं यस्य सः, तस्य - *बहुव्रीहिः*

पत्रस्वीकर्ता यां भाषां जानाति तया भाषया पत्रं लिख्यते खलु प्रायः ? पत्रव्यवहारे भाषा अपरिहार्यं साधनम् । किं संस्कृतं तादृशम् अपरिहार्यं साधनम् ? प्रायः सर्वत्र न । क्वचिदेव तत् अपरिहार्यं साधनं स्यात् । वयम् अन्याम् अपि भाषां सुष्ठु जानीमः एव इति कारणात् सा अन्या भाषा एव प्रायः पत्रव्यवहारस्य साधनत्वेन परिगण्यते, न तु संस्कृतम् । अतः एव

'संस्कृतेन पत्रव्यवहारः क्रियताम्' इति सानुरोधं निवेदनीयं भवति ।

संस्कृतेन पत्रव्यवहारविषये केचन अंशाः -

* संस्कृतज्ञः संस्कृतज्ञाय संस्कृतेन एव पत्रं लिखेत् । कदापि न अन्यया भाषया ।
* पत्रस्वीकर्ता संस्कृतस्य प्राथमिकज्ञानवान् केवलं यदि स्यात् तर्हि पत्रलेखनसमये सरलता विशेषतः आश्रयणीया ।
* संस्कृतानभिज्ञाय लेखनसमये अपि शिष्टाचारसम्बद्धानि प्राथमिक-वाक्यानि अन्तिमवाक्यानि च संस्कृतेन एव भवन्तु । मध्ये विषयः अन्यया भाषया भवतु नाम ।
* पत्रस्वीकर्तुः सङ्केतस्य उपरि ('To' इति स्थाने) 'सविधे' इति, प्रेषक-सङ्केतस्थानस्य उपरि ('From' इति स्थाने) 'सकाशात्' इति च सर्वदा लेखनीयम् ।
* लिपिविषये अधिकः अनुरोधः मास्तु । स्वीकर्ता यां लिपिं जानाति तया लिप्या पत्रलेखनं भवतु । भाषा संस्कृतं स्यात् इत्यत्र तु व्रतबुद्धिः भवतु ।
* शुभसन्देशः संस्कृतेन भवतु । आह्वानपत्राणि (उपनयन-विवाहादीनाम्) संस्कृतेन भवन्तु ।

पत्रलेखनसमये एते अंशाः अवश्यम् अनुसरणीयाः -

(१) शीर्षिका, (२) सम्बोधनम्, (३) विषयः, (४) समाप्तिः, (५) हस्ताङ्कनम्, (६) सङ्केतः ।

१. शीर्षिका

अ. पत्रारम्भे सर्वादौ 'श्रीः', 'ॐ', 'मात्रे नमः', 'श्री गुरुभ्यो नमः', 'कुलदेवतायै नमः', 'जय श्रीराम' इत्यादीनि लिख्यन्ते ।

आ. दक्षिणकोणे यस्मात् स्थानात् पत्रं लिख्यते तस्य स्थानस्य नाम निर्दिश्यते ।

इ. स्थाननाम्नः अधः तस्य दिनस्य तिथिः लिख्यते । आधुनिकाः तु दिनाङ्कं (Date) लिखन्ति । वाणिज्यपत्रेषु अन्यविधेषु केषुचित् पत्रेषु च अधः हस्ताङ्कनपङ्क्तौ वामभागे केचन दिनाङ्कं लिखन्ति ।

ई. वामकोणे कैश्चित् (न सर्वैः) 'क्षेमम्', 'कुशलम्' इत्यादीनि लिख्यन्ते ।

२. सम्बोधनम्

पत्रस्वीकर्तुः वयसः, स्थानस्य, मैत्र्याः च अनुगुणं सम्बोधनवाक्यानि भिद्यन्ते । सम्बोधनानन्तरं वैयक्तिकपत्रेषु कुशलप्रश्नविषये वाक्यानि भवन्ति ।

३. शरीरम्

पत्रद्वारा यत् सूचनीयम् अस्ति तत् अत्र भवति । पत्रे लघूनि सरलानि च वाक्यानि भवन्ति चेत् वरम् । लेखनसमये भावस्पष्टता सदा मनसि स्थापनीया । विषयभेदः यदा भवति तदा पृथगनुच्छेदः करणीयः । द्विरुक्तिः, अनपेक्षितः विस्तारः इत्यादयः अवश्यं परिहरणीयाः ।

४. समाप्तिः

लेखनीयानां सर्वेषाम् अंशानां लेखनस्य अनन्तरं वैयक्तिकपत्रेषु नमस्कारनिवेदनादिकं भवति । अन्ते 'इति'शब्दोत्तरं लेखितुः स्वीकर्तुः च सम्बन्धम् अवलम्ब्य एकं पदं पदद्वयं वा भवति ।

५. हस्ताङ्कनम्

'इति'पदस्य अधः लेखकः स्वस्य हस्ताङ्कनं करोति । वाणिज्यपत्रं कार्यालयीयपत्रम् इत्यादिषु हस्ताङ्कनकर्तुः नामनिर्देशः स्थाननिर्देशः च क्रियते ।

६. सङ्केतः

पूर्वोक्तान् सर्वान् क्रमान् समाप्य स्वीकर्तुः सङ्केतः (Address) स्फुटतया लेखनीयः । पत्रालयनाम, जनपद(जिल्ला)नाम, राज्यनाम इत्यादयः अवश्यं लेखनीयाः । पत्रालयस्थानसङ्ख्या (Pin Code) अपि लेखनीया । अतिपरिचिताय यदा लिख्यते तदा लेखकस्य सङ्केतः न आवश्यकः । इतरेषु सर्वेषु प्रसङ्गेषु प्रेषकस्य सङ्केतः अपि लेखनीयः । 'स्फुटसङ्केतलेखनं, पत्रालयसङ्ख्या(Pin Code)लेखनं च विलम्बं निवारयति' इति सदा स्मर्तव्यम् ।

पत्रसोपानसङ्क्षेपः

अग्रे कानिचन पत्राणि प्रदर्शितानि सन्ति । तेषु सम्बोधनसमाप्त्यादिकं प्रदर्शितम् अस्ति एव । तथापि चित्रवत् मनसि स्थापनार्थं सम्बोधनादयः विषयाः अत्र सङ्क्षेपेण सङ्गृह्यन्ते ।

अ) सम्बोधनम्

मान्याः / पूज्याः / महोदयाः / अयि भो मान्याः
प्रियबन्धो / आदरणीयबन्धो / बन्धुवर
प्रियसहोदर / प्रियभ्रातः
प्रियभगिनि / प्रियसहोदरि
तीर्थरूपाणां चरणसन्निधौ / पूज्यानां पितृचरणानां चरणसन्निधौ
तीर्थरूपसमानानां चरणसन्निधौ
मातृश्रीचरणानां चरणसन्निधौ
मातृश्रीसमानानां चरणसन्निधौ
परमपूज्यानां श्रीचरणानां चरणसन्निधौ
परमप्रीतिपात्र ... / प्रियमित्र / सुहृन्मणे
प्रियसखि / प्रियवयस्ये
वत्स / प्रिय ... / चिरञ्जीविन् !

आ) नमस्कारः / आशीर्वादः

सादरं वन्दनानि ।
सविनयप्रणामाः / प्रणामाः
नमांसि/ नमांसि भूयांसि ।
स्वस्ति ।
सस्नेहप्रणामाः / नमस्ते
सप्रश्रयं प्रणतयः / भक्तिपूर्वकं प्रणामाः ।
शुभाशिषः / आशिषः / आशीर्वादाः
दीर्घायुष्यं कामये ।

इ) कुशलनिवेदनम्

अहं कुशली । (पुं)
अहं कुशलिनी । (स्त्री)
सर्वं कुशलम् / सर्वं कुशलं खलु ?
अत्र वयं सर्वे कुशलिनः ।
भगवतः / देवस्य दयया / कृपया / करुणया सर्वं कुशलम् ।
कुलदेवतानुग्रहेण अत्र वयं सर्वे कुशलिनः ।

भवतः आशीर्वादेन अहं कुशली (पुं) / कुशलिनी (स्त्री) अस्मि ।

ई) कुशलप्रश्नः

भवान् कुशली खलु ? (पुं)
भवती कुशलिनी खलु ? (स्त्री)
तत्र सर्वं कुशलं खलु ?
तत्र सर्वे कुशलिनः खलु ?
अहं कुशली । (पुं) / अहं कुशलिनी । (स्त्री) भवन्तः सर्वे कुशलिनः इति भावयामि / विश्वसिमि / चिन्तयामि ।

उ) आरम्भवाक्यानि द्वित्राणि

भवतः पत्रं प्राप्तम् / न प्राप्तम् ।
भवतः पत्रं ह्यः / परह्यः / प्रपरह्यः / त्रिचतुरेभ्यः दिनेभ्यः पूर्वं / गतसप्ताहे / गतमासे / सद्यः एव प्राप्तम् ।
पत्रस्य आशयः / अभिप्रायः ज्ञातः / अवगतः / विदितः / गृहीतः ।
पत्रं पठित्वा अहं सन्तुष्टः / वयं सर्वे सन्तुष्टाः ।
बहुकालतः / बहोः कालतः भवतः पत्रम् एव नास्ति । कारणं किमिति न जानामि ।
उत्तरलेखने विलम्बः जातः ।
क्षम्यताम् / क्षमां याचे / क्षमां प्रार्थये / क्षन्तव्यः अहम् / क्षन्तव्योऽयं जनः ।

ऊ) अन्ते द्वित्राणि वाक्यानि

नान्यः विशेषः ।
अन्यः कोऽपि विशेषः नास्ति ।
मम नमस्कारान् मातरं / पितरं / .... / सर्वान् निवेदयतु ।
ज्येष्ठेभ्यः सर्वेभ्यः प्रणामाः / नमस्काराः । कनिष्ठेभ्यः आशीर्वादाः ।
बालाय / बालिकायै आशिषः / आशीर्वादाः ।
शीघ्रम् / अविलम्बेन / पत्रप्राप्तिसमनन्तरम् एव उत्तरं लिखतु / तदा तदा पत्रं लिखतु ।
उत्तरलेखनं मा विस्मरतु ।
अविस्मृत्य पत्रं लिखति खलु भवान् / भवती ?

शिष्टं पत्रान्तरे / अग्रे
शिष्टं भवदुत्तरप्राप्त्यनन्तरम् ।
भवतः प्रत्युत्तरं निरीक्षमाणः / निरीक्षमाणा विरमामि ।

ऋ) इति

इति भवदीयः / त्वदीयः विश्वासी (पुं)
इति भवदीया / त्वदीया विश्वासिनी (स्त्री)
इति भवदभिन्नः / भवदभिन्ना
इति भवदाशीर्वादाभिलाषी / भवदाशीर्वादाभिलाषिणी
इति भवदीयं विश्वासपात्रम्
इति भवतां विधेयः
इति प्रियसुहृत् / प्रियसखी
इति भवत्याः प्राणप्रियः / भवतः प्राणप्रिया
इति भवच्छुभाकाङ्क्षी / इति भवच्छुभाकाङ्क्षिणी
इति प्रियशिष्यः / प्रियशिष्या

* * *

पत्रलेखनप्रकाराः केचन

पत्रलेखनशैल्याः केचन प्रकाराः इदानीम् अत्र उदाह्रियन्ते ।

पत्रम् - १
पितरं प्रति पुत्रस्य पत्रम्

श्रीः ....

परमपूज्यानां पितृचरणानां पादयोः साष्टाङ्गं प्रणामाः । अहम् अत्र कुशली । तत्र भवन्तः सर्वेऽपि कुशलिनः इति मन्ये ।

अत्र मम पठनं सम्यक् प्रचलति । अर्धवार्षिकी परीक्षा समाप्ता । आगामिनि सप्ताहे अस्माकं विद्यालयस्य केचन मम सुहृदः अध्यापकैः सह प्रवासार्थं मैसूरुनगरं गमिष्यन्ति । अहम् अपि तैः सह गन्तुम् इच्छामि । अतः

भवताम् अनुमतिं प्रार्थये । प्रवासार्थं शुल्कं दातुम् अन्यव्ययार्थं च धनस्य आवश्यकता अस्ति। कृपया पञ्चशतं रूप्यकाणि प्रेषयन्तु भवन्तः । मातृचरणयोः मम प्रणामाः । पत्रं लिखन्तु ।

इति भवदीयः पुत्रः
(हस्ताङ्कनम्)

पत्रम् - २
विरामार्थम् आवेदनपत्रम्

।। श्रीः ।। ....

सविधे,
मुख्योपाध्यायाः
विद्यावर्धिनीप्रौढशाला, कोलारनगरम्

मान्याः मुख्योपाध्यायाः,

अहं श्वः मातापितृभ्यां सह यात्रोत्सवार्थं धर्मस्थलं गन्तुम् इच्छामि । अतः कृपया दिनत्रयस्य विरामदानेन अहम् अनुग्रहणीयः इति प्रार्थये । विराम-समये पाठ्यमानान् पाठान् मित्राणां सकाशतः ज्ञात्वा अहम् अवश्यं क्षतिं पूरयिष्यामि ।

इति भवतां विधेया विद्यार्थिनी
नाम, कक्ष्या, शाला

पत्रम् - ३
पुस्तकप्रेषणाय आवेदनम्

आवेदिका -
श्रीमती निर्मला. एच्. एम्
सह्याद्रिनगरम्, भद्रावती

स्वीकर्ता -
व्यवस्थापकः
मोतिलालबनारसीदासप्रकाशनम्, जवाहरनगरम्, देहली
मान्याः,

विषयः - पुस्तकप्रेषणाय आवेदनम् ।

भवद्भिः प्रकाशितस्य 'प्रबन्धसङ्ग्रहः' इत्येतस्य पुस्तकस्य विषयम् अहं

ज्ञातवती । सद्यः एव तस्य पुस्तकस्य उपयोगः मया अपि स्वीकरणीयः इति मम अपेक्षा । तदर्थं तत् पुस्तकं प्राप्तुम् इच्छामि । यावच्छीघ्रं तस्य एकां प्रतिकृतिं मह्यं प्रेषयन्तु कृपया इति निवेदये ।

दिनाङ्कः .... भवदीया

स्थलम् - भद्रावती निर्मला एच्. एम्.

पत्रम् - ४

नगरपालिकां प्रति पत्रम्

आवेदकः -
श्री बि.जि. श्रीनिवासः
शङ्करपुरम्
बेङ्गलूरु

स्वीकर्ता -
प्रबन्धप्रमुखः
नगरपालिकाकार्यालयः, जे.सि. रोड्, बेङ्गलूरु

मान्याः,

विषयः - नगरस्य एकस्मिन् भागे स्वच्छतापालनदृष्ट्या निवेदनम्।

अहं पञ्चदशभ्यः वर्षेभ्यः शङ्करपुरनिवासी अस्मि । अहम् अस्मिन् स्थाने अधिकृते मदीये गृहे निवसामि । अयं प्रदेशः बेङ्गलूरुनगरे एव शुद्धः शुचिजननिवासः इति भवन्तः जानन्ति एव । किन्तु सप्ताहद्वयतः अत्र कुजलकुल्यातः बहिः जलं निस्सरति । तेन अयं प्रदेशः दुर्गन्धेन व्याप्तः अस्ति । मार्गेषु जलप्रवाहकारणात् जनानां गमनागमनम् अपि कष्टकरं सञ्जातम् अस्ति ।

अतः अविलम्बेन भवन्तः एतद्विषये योग्यां व्यवस्थां कुर्वन्तु इति सविनयं निवेद्यते ।

दिनाङ्कः .... इति सन्त्रस्तः

बि.जि. श्रीनिवासः

इ. उपसंहारः

प्रियबान्धवाः

पत्रालयसंस्कृतशिक्षणस्य 'कोविद'परीक्षायाः एषः उपान्त्यपाठः । पत्रालयपाठमाला समाप्तप्राया । संस्कृतभाषापरिचयं सम्प्राप्तुं भवन्तः प्रयत्नं कृतवन्तः यत्, विशेषासक्तिं प्रदर्शितवन्तः यत्, तदर्थम् अभिनन्दनानि ।

एतस्यां योजनायां संस्कृतभाषायाः सामान्यं परिचयं दातुं प्रयत्नः कृतः । इदानीं यत् ज्ञानं प्राप्तं तस्य आधारेण भवद्भिः अग्रे अपि यथाशक्ति अध्ययनं करणीयम् । अग्रिमाध्ययनं कथं कर्तुं शक्यते इति विषये किञ्चित् अत्र निवेद्यते ।

भाषाभ्यासः चतुर्विधः भवति । श्रवणं, भाषणं, पठनं, लेखनं चेति भाषायाः चत्वारि सोपानानि । एतानि भाषाकौशलानि इति उच्यन्ते । यदा एतानि चतुर्विधानि अपि कौशलानि अस्मदधीनानि भवन्ति तदा एव अस्माकं भाषाज्ञानं परिपूर्णं भविष्यति । एतया दृष्ट्या अपि अस्माभिः प्रयत्नः करणीयः ।

चतुर्विधकौशलार्थं महान् प्रयासः एव करणीयः इति नास्ति । प्रतिदिनं भवन्तः अल्पम् एव प्रयासं नियतरूपेण कुर्वन्ति चेत् गच्छता कालेन तानि कौशलानि भवदधीनानि भवन्ति ।

तेषां कौशलानां स्वायत्तीकरणार्थं केचन मार्गाः अधः निर्दिष्टाः सन्ति -

☛ **श्रवणकौशलस्य वर्धनार्थम् -**

- प्रतिदिनं प्रातः सायं च आकाशवाण्या संस्कृतवार्ता प्रसार्यते । तस्याः श्रवणम् ।
- प्रतिदिनं दूरदर्शनेन प्रसार्यमाणायाः संस्कृतवार्तायाः श्रवणम् ।
- आकाशवाण्या दूरदर्शनेन तदा तदा संस्कृतकार्यक्रमाः प्रसार्यन्ते । तेषां श्रवणम् ।
- संस्कृतकार्यक्रमाः यत्र यत्र भवन्ति तत्र गमनं, भाषाश्रवणं च ।
- संस्कृतसम्भाषणशीलानां सम्पर्कं कृत्वा आत्मीयतां सम्पाद्य स्वयं सम्भाषणं कृत्वा व्यावहारिकसंस्कृतस्य श्रवणम् ।
- ध्वनिमुद्रिकाणां श्रवणम् । संस्कृतभारत्या एव बह्व्यः ध्वनिमुद्रिकाः प्रकाशिताः सन्ति ।

☛ **भाषणकौशलस्य वर्धनार्थम्–**

- यदा अवकाशः भवति तदा सम्भाषणशिबिरे भागग्रहणम् । (शिबिरं दशदिनावधिकं प्रतिदिनं घण्टाद्वयात्मकं च भवति ।)
- इदानीं यत् भाषाज्ञानं सम्पादितम् अस्ति तस्य उपयोगार्थं व्यवस्थितः प्रयत्नः ।
- यत्र यत्र सम्भाषणशिबिरेषु भागं गृहीतवन्तः जनाः, संस्कृतज्ञाः वा मिलन्ति तत्र सम्भाषणार्थं प्रयत्नः ।
- सभादिषु स्पर्धादिषु वा संस्कृतेन वक्तुम् अवकाशः लब्धः चेत् निस्सङ्कोचं प्रवृत्तिः ।
- ये संस्कृतसम्भाषणे आसक्ताः सन्ति तादृशानां निमित्तं साप्ताहिक-मेलनादिकम् आयोजयितुं प्रयत्नः ।

☛ **पठनकौशलस्य वर्धनार्थम् -**

- संस्कृतपत्रिकाणां ग्राहकत्वं स्वीकृत्य तासां पठनम् । तत्रापि सरलसंस्कृतेन याः भवन्ति तासां पठनेन विशेषलाभः भविष्यति । अतः सम्भाषण-सन्देशः, संस्कृतचन्दमामा इत्यादीनां पठनं सदा करणीयम् । नियतरूपेण सम्भाषणसन्देशपत्रिकायाः पठनात् भाषाभ्यासः तु भवति एव । तेनैव सह संस्कृतप्रचारान्दोलनसम्बद्धाः विषयाः अपि बहवः ज्ञायन्ते । संस्कृतचन्दमामा तु कथात्मिका भवति । तस्याः नियततया पठनं भाषाभ्यासाय नितान्तम् उपकारकम् । तत्रत्यानां पदानाम् अवगमनं प्रतिशब्दं भवितुम् अर्हति ।
- संस्कृतभारती (बेङ्गलूरु), श्री अरविन्दाश्रमः (पाण्डिचेरी), सार्वभौम-संस्कृतप्रचारकार्यालयः [D - 38/110, हौज् कटोरा, वाराणसी] इत्यादयः संस्थाः अन्यसंस्थाः च सरलसंस्कृतपुस्तकानि प्रकाशयन्ति । ताभिः प्रकाशितानां पुस्तकानां विशेषोपयोगः ।
- सरलसुभाषितसङ्ग्रहाः, पञ्चतन्त्रहितोपदेशादयः, सरलनाटकानि इत्यादीनि पठितुं प्रयत्नः ।
- आधुनिकं साहित्यम् अपि संस्कृतेन प्रकाश्यते एव । तस्य यथाशक्ति उपयोगः ।
- संस्कृतपुस्तकसहितानां ग्रन्थालयानाम् उपयोगः ।

- सरलव्याकरणपुस्तकानां पठनम् ।
  कालबोधिनी, अभ्यासदर्शिनी, सम्भाषणसोपानम्, णत्वणिजन्तम्, सन्धिः, समासः, कारकम्, शुद्धिकौमुदी इत्यादीनि पुस्तकानि (संस्कृत-भारत्या प्रकाशितानि) व्याकरणसम्बद्धानि सन्ति ।
- भारतीयविद्याभवनं, सुरसरस्वतीसभा (कर्णाटकम्), स्वाध्यायमण्डलं (पारडी) इत्यादयः बह्व्यः संस्थाः सरलसंस्कृतपरीक्षाः चालयन्ति । राज्यसर्वकारद्वारा अन्यसंस्थाद्वारा वा स्थाने स्थाने अन्यविधाः परीक्षाः अपि भवन्ति । तासां परीक्षाणां निमित्तं पठितुम् अपि शक्यते ।
- मोतीलालाबनारसीदास् (वाराणसी, देहली, पाटना, मद्रास्, बेङ्गलूरु चौखाम्बाप्रकाशनम् (वाराणसी), गीताप्रेस् (गोरखपुर) इत्यादयः संस्थाः महता प्रमाणेन संस्कृतपुस्तकानि प्रकाशयन्ति । एताभिः प्रकाशितानि पुस्तकानि स्थानीयेषु पुस्तकापणेषु उपलभ्यन्ते । तानि अपि पठनार्थम् उपयोक्तव्यानि ।

☛ **लेखनकौशलस्य वर्धनार्थम् -**

- संस्कृतज्ञमित्रेभ्यः संस्कृतेन एव पत्रलेखनम् ।
- संस्कृतपत्रिकाभ्यः प्रतिस्पन्दरूपेण वाचकविभागाय वा पत्राणां लेखनम् ।
- यदा यदा समयः प्राप्यते तदा तदा सरलकथादीनाम् अनुवादः, संस्कृत-पत्रिकाभ्यः उत्तमानां कथानां प्रेषणम् ।
- भाषाभ्यासार्थम् एव विविधानि पुस्तकानि उपलभ्यन्ते । तेषां सर्वेषाम् उपयोगः ।
- ये व्याकरणांशाः एतावता एव अस्माभिः ज्ञाताः तान् उपयुज्य बहूनां लघुवाक्यानां लेखनम् ।

एवं भाषाभ्यासार्थं सन्ति बहवः उपायाः । बह्व्यः संस्थाः संस्कृतप्रचारं कुर्वन्ति । तासां कार्येषु अस्माभिः यथाशक्ति सहकारः दातव्यः । समयदानं, धनदानं, कार्यकर्तृत्वस्वीकारः इत्यादिभिः उपायैः अस्माभिः सहकारः दातुं शक्यते । एतादृशैः कार्यैः आत्मसन्तोषः, आत्मवृद्धिः, भाषाभिवृद्धिः च अवश्यं भवति । संस्कृतभारत्याः सर्वेषु अपि सेवाकार्येषु भवतां सहकारः अवश्यम् अपेक्ष्यते । मातृभूमिसेवया मातृभारतीसेवया च जीवनस्य सार्थक्यं

सिद्ध्यति । अतः वयं सर्वे यथाशक्ति सेवाकार्येषु प्रवृत्तिं प्रदर्शयन्तः जीवनस्य सार्थक्यं सम्पादयेम ।

'अक्षरं' संस्कृतभारत्याः कार्यालयः (कर्णाटके) । प्रतिराज्यं संस्कृत-भारत्याः कार्यालयाः भवन्ति एव । इतः विविधानि संस्कृतकार्याणि प्रचाल्यन्ते । संस्कृतपुस्तकानि क्रेतुं, संस्कृतसम्भाषणं श्रोतुं, विविधानां सेवाकार्याणां विवरणं, प्रत्यक्षदर्शनं च प्राप्तुं, विविधेषु प्रकल्पेषु सहकारं सूचयितुं, साहाय्यं किमपि प्राप्तुं च भवन्तः यदा कदापि अक्षरं प्रति, अन्यं संस्कृतभारतीकार्यालयं प्रति आगन्तुम् अर्हन्ति । एते भवताम् एव कार्यालयाः । एतान् प्रति आगमनाय सदा स्वागतम् ।

।। शुभमस्तु ।।

कोविदः - द्वादशः पाठः

।। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।।

अस्माकं सुकृतस्य दुष्कृतस्य च फलम् अस्माभिः अनुभोक्तव्यम् एव ।

प्रियबन्धो,

एतावता भवन्तः कोविददीक्षायाः एकादशपाठान् पठितवन्तः । द्वादशे एतस्मिन् प्रश्नपत्रिका एका, तत्रत्यानां प्रश्नानाम् उत्तराणि च दीयन्ते । अन्ते पुनः अन्या प्रश्नपत्रिका अपि दत्ता अस्ति । एतेषाम् अभ्यासेन भवतां परीक्षायाः पूर्वसन्नाहः उत्तमः भवति इति विश्वासं कुर्मः । आशास्महे च यत् भवन्तः परीक्षायाम् उत्तमान् अङ्कान् लब्ध्वा उत्तीर्णाः भवेयुः इति ।

प्रश्नपत्रिका - १

समयः - घण्टात्रयम् **अङ्काः - १००**

I. *(अ) समस्तपदं लिखित्वा समासनाम लिखत । (**षण्णाम्**)* ६

१. भूमेः गुणः २. कवेः रचना

३. शास्त्रम् अनतिक्रम्य ४. न विद्यते वस्त्रं यस्य सः

५. सप्तानाम् अह्नां समाहारः ६. जयश्च अपजयश्च

७. जन्म च मृत्युश्च

(आ) स्थूलाक्षरैः निर्दिष्टानां पदानां विग्रहवाक्यानि लिखत ।

*(**षण्णाम्**)* ६

१. आकाशे **नीलमेघाः** दृश्यन्ते ।
२. जनाः **कुरूपं** न इच्छन्ति ।
३. अस्माकं शिक्षकः **शास्त्रज्ञः** अस्ति ।
४. अध्यापकः **अष्टाध्यायीं** परिशीलयति ।
५. कार्यस्य आरम्भे **प्रसन्नवदनं** देवं ध्यायेत् ।
६. **ससीतः** रामः वनं गतः ।
७. **परोपकारः** पुण्याय भवति ।

(इ) अधोनिर्दिष्टेषु वाक्येषु रेखाङ्कितानि पदानि परिष्कुरुत । ५

१. बहुव्रीहिसमासः उत्तरपदप्रधानः भवति ।
२. कर्मधारयः असमानविभक्तिकः भवति ।
३. इच्छार्थे णिच्प्रत्ययः भवति ।
४. उपमानोपमेययोः सादृश्यं यत्र वर्ण्यते सः रूपकालङ्कारः ।
५. बहुषु एकस्य गुणातिशयः यत्र उच्यते तत्र तरप्प्रत्ययः प्रयुज्यते ।

(ई) विग्रहवाक्यं लिखत । १०

१. निद्राभावसमस्या २. संस्कृतसाहित्याभ्यासः
३. पुस्तकपठनश्रमः ४. जनसंख्यास्फोटः
५. चित्रकारगृहनिर्माणम्

II. *(अ) चतुर्थं पदं लिखत ।* ५

१. द्रोणः - द्रौणिः, वरुणः - ....
२. गङ्गा - गाङ्गेयः, कुन्ती - ....
३. धीरस्य भावः - धैर्यम्, मधुरस्य भावः - ....
४. धनम् अस्य अस्ति इति - धनवान्,
शक्तिः अस्य अस्ति इति - ....
५. दण्डः अस्य अस्ति इति - दण्डी,
गुणाः अस्य सन्ति इति - ....

(आ) णिजन्तं रूपं, तस्य भविष्यद्रूपं च लिखत । ५

१. हसति ....
२. ददाति ....

३. जानाति ....
४. तिष्ठति ....
५. गच्छति ....

(इ) उदाहरणानुगुणं रूपाणि लिखत । ५

उदा - जिगमिषा - जिगमिषति, जिगमिषुः
१. विवक्षा ---- ----
२. चिकीर्षा ---- ----
३. शुश्रूषा ---- ----
४. पिपासा ---- ----
५. जिज्ञासा ---- ----

III. *(अ) गुरुलघुचिह्नम् अङ्कयित्वा गणनाम लिखत ।* ५

१. माधवः ----- -----
२. गणना ----- -----
३. चालय ----- -----
४. नयति ----- -----
५. सामान्यः ----- -----

(आ) गुरुलघुचिह्नानि अङ्कयित्वा छन्दसः नाम निर्दिशत । ३

नारायणायेति समर्पयामि

(इ) रामस्य **मुखचन्द्रं** दृष्ट्वा प्रजाः सन्तुष्टाः । ३

अत्र कः अलङ्कारः ? तस्य कारणं किम् ? कन्नडभाषया आङ्ग्लभाषया वा विवृणुत ।

IV. *(अ)* ***त्रयाणाम्*** *अन्वयार्थं कन्नडभाषया आङ्ग्लभाषया वा, तात्पर्यं च संस्कृतेन लिखत ।* १२

१. प्रणयो मरणान्तः स्यात् कोपस्तु क्षणभङ्गुरः ।
उपदेशो यथाकालं विद्वेषो न कदाचन ।।

२. अनेकशास्त्रं बहु वेदितव्यम्
अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासितव्यम्
हंसो यथा क्षीरमिवाम्बुमध्यात् ।।

३. साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम् ।।

४. गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा ।
पापं तापं च दैन्यं च हन्ति सन्तो महाशयाः ।।

(आ) पद्यद्वयस्य पदविभागम् अन्वयरचनां च लिखत । ८

१. अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।।

२. आस्वादवद्भिः कवलैस्तृणानां
कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः
सम्राट् समाराधनतत्परोऽभूत् ।।

३. इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ।।

V. *(अ) कः कम् अवदत् इति संस्कृतेन लिखत ।* ६

१. अहङ्कारी तारकः लोकान् पीडयति ।
२. अनन्यभाजं पतिम् आप्नुहि ।
३. हरः श्मशाने विद्यमानः अपि त्रिलोकनाथः ।
४. सम्प्रति राजानः अत्र नागच्छन्ति ।
५. अहं पराधीनः, परसैन्ये स्थितः ।
६. साक्षात् विष्णुः तव देवरः भविष्यति ।

*(आ) संस्कृतेन उत्तरं लिखत । **(पञ्चानाम्)*** ५

१. संस्कृतनाटकेषु मङ्गलपद्यस्य नाम किम् ?
२. हर्षचरितं केन लिखितम् ?
३. 'इतिहास'शब्दस्य अर्थः कः ?
४. चम्पूः नाम का ?
५. दर्शनक्षेत्रे नास्तिकाः नाम के ?
६. इदानीम् उपलभ्यमानः निघण्टुः कः ?

(इ) संयोजयत । ५

अ	आ
१. मृच्छकटिकम्	बृहत्कथासङ्ग्रहः
२. कथासरित्सागरः	पञ्चतन्त्रस्य परिष्कृतावृत्तिः
३. लीलावती	वसन्तसेना-चारुदत्तकथा
४. हितोपदेशः	टि.गणपतिशास्त्री
५. भासनाटकानि	सिद्धान्तशिरोमणिभागः

*(ई) **एकं** विषयम् अधिकृत्य संस्कृतेन दश वाक्यानि लिखत ।* ५

१. भारतदेशः २. संस्कृतभाषा ३. इतिहासः

*(उ) अन्तलिङ्गविभक्तिवचनानि लिखत । **(षण्णाम्)*** ६

१. अद्रौ २. मनुष्यवाचा ३. अष्टमूर्तिम्
४. धारयताम् ५. आचारलाजैः ६. धुरि
७. प्रभाते

***

कोविदपरीक्षा
प्रथमप्रश्नपत्रिकायाः उत्तराणि

[अत्र उत्तराणि अतिसङ्क्षिप्ततया दत्तानि । परीक्षायाम् अपेक्षानुसारं तानि विस्तरणीयनि । क्वचित् पाठसंख्या पुटसंख्या च सूचिता । तादृशे प्रसङ्गे उत्तराणि ततः चेतव्यानि ।]

I. (अ) १. भूमिगुणः - तत्पुरुषः २. कविरचना - तत्पुरुषः ३. यथाशास्त्रम् - अव्ययीभावः ४. अवस्त्रः - बहुव्रीहिः ५. सप्ताहः – द्विगुः ६. जयापजयौ – द्वन्द्वः ७. जन्ममृत्यू – द्वन्द्वः

(आ) १. नीलाश्च ते मेघाश्च २. कुत्सितं रूपम् ३. शास्त्रं जानाति इति ४. अष्टानाम् अध्यायानां समाहारः, ताम् ५. प्रसन्नं वदनं यस्य सः, तम् ६. सीतया सह वर्तते इति ७. परेषाम् उपकारः

(इ) १. अन्यपदार्थप्रधानः २. समानविभक्तिकः ३. सन्प्रत्ययः ४. उपमालङ्कारः ५. तमप्प्रत्ययः

(ई) १. निद्रायाः अभावः, निद्राभावस्य समस्या २. संस्कृतस्य साहित्यम्, संस्कृतसाहित्यस्य अभ्यासः ३. पुस्तकस्य पठनम्, पुस्तकपठनस्य श्रमः ४. जनानां संख्या, जनसंख्यायाः स्फोटः, ५. चित्रं करोति इति, चित्रकारस्य गृहम्, चित्रकारगृहस्य निर्माणम् ।

II. (अ) १. वारुणिः २. कौन्तेयः ३. माधुर्यम् ४. शक्तिमान् ५. गुणी

(आ) १. हासयति, हासयिष्यति २. दापयति, दापयिष्यति ३. ज्ञापयति, ज्ञापयिष्यति ४. स्थापयति, स्थापयिष्यति ५. गमयति, गमयिष्यति ।

(इ) १. विवक्षति, विवक्षुः २. चिकिर्षति, चिकीर्षुः, ३. शुश्रूषति शुश्रूषुः ४. पिपासति, पिपासुः ५. जिज्ञासति, जिज्ञासुः

III. (अ) १. –ᴗ– = रगणः २. ᴗᴗ– = सगणः ३. –ᴗᴗ = भगणः ४. ᴗᴗᴗ = नगणः ५. ––– = मगणः

(आ) ––ᴗ /––ᴗ / ᴗ–ᴗ /–– = इन्द्रवज्रा

(इ) रूपकालङ्कारः । मुखम् - उपमेयम्, चन्द्रः - उपमानम्
Non-difference between Upamana and Upameya is described here. Therefore it is Rupakalankara.

IV. (अ) १. Please refer to 10 lesson, 209 page.
२. Please refer to 9 lesson, 189 page.
३. Please refer to 3 lesson, 53 page.
४. Please refer to 4 lesson, 76 page.

(आ) १. Please refer to 4 lesson, 79 page.
२. Please refer to 2 lesson, 38 page.
३. Please refer to 3 lesson, 61 page.

V. (अ) १. बृहस्पतिः ब्रह्मदेवम् अवदत् । *(पाठः - १)*
२. ईश्वरः पार्वतीम् अवदत् । *(पाठः - २)*
३. पार्वती ब्रह्मचारिणम् अवदत् । *(पाठः - ३)*
४. इन्द्रः नारदम् अवदत् । *(पाठः - ७)*
५. चार्वाकः देवेन्द्रम् उक्तवान् । *(पाठः - १०)*
६. दूती भैमीम् अवदत् । *(पाठः - ८)*

(आ) १. संस्कृनाटकेषु मङ्गलपद्यस्य नाम 'नान्दी' इति ।
२. हर्षचरितं बाणेन लिखितम् ।
३. 'इति ह आस' (पूर्वम् एवम् आसीत् किल) इति ।
४. गद्यपद्यमयं काव्यं 'चम्पूः' इति उच्यते ।
५. ये वेदप्रामाण्यं न अङ्गीकुर्वन्ति ते 'नास्तिकाः' इति उच्यन्ते दर्शनक्षेत्रे ।
६. इदानीम् उपलभ्यमानः निघण्टुः नाम यास्कस्य 'निरुक्तम्' ।

(इ) १. मृच्छकटिकम् वसन्तसेनाचारुदत्तकथा
२. कथासरित्सागरः बृहत्कथासङ्ग्रहः
३. लीलावती सिद्धान्तशिरोमणिभागः
४. हितोपदेशः पञ्चतन्त्रस्य परिष्कृतावृत्तिः
५. भासनाटकानि टि. गणपतिशास्त्री

(ई) १. भारतदेशः - (एकादशं पाठं पश्यत)

२. संस्कृतभाषा - (एकादशं पाठं पश्यत)
३. इतिहासः - (तृतीये पाठे संस्कृतसाहित्यपरिचयं पश्यत)

(उ) १. अद्रौ - इ. पु. स.वि. ए.व.
२. मनुष्यवाचा - च. स्त्री. तृ.वि. ए.व.
३. अष्टमूर्तिम् - इ. पु. द्वि.वि. ए.व.
४. धारयताम् - त. पु. ष.वि. ब.व.
५. आचारलाजैः - अ. पु. तृ.वि. नि.ब.व.
६. धुरि - रेफान्तः स्त्री. स.वि. ए.व.
७. प्रभाते - अ. न. स.वि. ए.व

***

कोविदपरीक्षा
प्रश्नपत्रिका - २

समयः - घण्टात्रयम् **अङ्काः - १००**

I. *(अ) सूचितस्य समासप्रभेदस्य उदाहरणं लिखत ।* **(षण्णाम्)** ६

१. तृतीयातत्पुरुषः ....
२. द्विगुः (ईकारान्तः) ....
३. व्यधिकरणबहुव्रीहिः ....
४. नञ्बहुव्रीहिः ....
५. विभक्त्यर्थकः अव्ययीभावः ....
६. समाहारद्वन्द्वः ....
७. प्रादितत्पुरुषः ....

(आ) स्थूलाक्षरैः निर्दिष्टानां पदानां विग्रहवाक्यानि लिखत । **(षण्णाम्)** ६

१. **भीमार्जुनौ** उभौ अपि शूरौ एव ।
२. रामः **प्रतिदिनं** व्यायामं करोति ।
३. हिमालयपर्वतः **उन्नतशिखरः** अस्ति ।
४. **कुसुमहस्ताः** नर्तक्यः रङ्गं प्रविशन्ति ।
५. जैनमुनिः **श्वेताम्बरं** धरति ।
६. श्रीमान् शेषण्णः **वीणावादननिपुणः** आसीत् ।
७. **लक्ष्मीसरस्वत्यौ** धनस्य विद्यायाश्च अधिदेवते ।

(इ) अधोनिर्दिष्टेषु वाक्येषु रेखाङ्कितानि पदानि परिष्कुरुत । ५

१. त्वा, तुम्, तव्य - एते तद्धितप्रत्ययाः
२. काव्यकुशलः - अत्र बहुव्रीहिसमासः
३. उपमानपूर्वपदः - तत्पुरुषस्य प्रभेदः
४. 'मोहमुद्गरः' भर्तृहरिणा लिखितः
५. उपमान-उपमेययोः अभेदः यत्र वर्ण्यते तत्र उपमालङ्कारः ।

(ई) विग्रहवाक्यं लिखत - १०

१. भूतबलिसमर्पणम् २. कुपुरुषसेवा
३. त्रिलोकीप्रभुः ४. पाणिपादप्रक्षालनम्
५. प्रसन्नवदनपूजा

II. *(अ) अधोनिर्दिष्टानां तद्धितान्तानां विग्रहवाक्यं लिखत ।* ५

१. दौष्यन्तिः - ....
२. राधेयः - ....
३. श्रीमान् - ....
४. पाश्चात्यः - ....
५. अश्ववत् - ....

(आ) णिजन्तं रूपं, तस्य क्तवतुप्रत्ययान्तं रूपं च लिखत । ५

उदा - गच्छति -	गमयति	गमितवान्
१. स्मरति	....	....
२. तिष्ठति	....	....
३. पिबति	....	....
४. लिखति	....	....
५. शृणोति	....	....

(इ) गणे अनर्हं पदं बहिष्कुरुत । ५

१. जिगमिषा, विभूषा, पिपासा, पिपठिषा ।
२. अन्विष्यति, तितीर्षति, विवक्षति, चिकीर्षति
३. दित्सुः, ईप्सुः विवक्षुः इक्षुः
४. जिगमिषुः पिपठिषा, विवक्षुः चिकीर्षुः
५. बुभूषवः, जिघांसवः, दित्सवः, विवक्षुः

III. *(अ) संयोज्य गणनाम लिखत ।* ५

(अ)	(आ)	
१. राघवः	१. –∪∪	-----
२. ललना	२. ∪∪∪	-----

३. पालय ३. –∪– ———

४. जयतु ४. ––– ———

५. सङ्गीता ५. ∪∪– ———

(आ) लघुगुरुचिह्नानि अङ्कयित्वा छन्दसः नाम निर्दिशत । ३

शरीरमाद्यं खलु धर्मसाधनम्

(इ) हनुमान् अब्धिम् अतरत्, दुष्करं किं महात्मनाम् । ३
अत्र कः अलङ्कारः ? कन्नडभाषया आङ्ग्लभाषया संस्कृत-भाषया वा विवृणुत ।

IV. *(अ)* ***द्वयोः*** *अन्वयार्थं कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* ८

१. सुहृद्भिराप्तैरसकृद्विचारितं
स्वयं च बुद्ध्या प्रविचारिताश्रयम् ।
करोति कार्यं खलु यः स बुद्धिमान्
स एव लक्ष्म्या यशसां च भाजनम् ।।

२. यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ।।

३. साहित्यसङ्गीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः
तद्भागधेयं परमं पशूनाम् ।।

(आ) ***एकस्य*** *तात्पर्यं संस्कृतेन लिखत ।* ४

१. सुजनो न याति विकृतिं
परहितनिरतो विनाशकालेऽपि
छेदेऽपि चन्दनतरुः
सुरभयति मुखं कुठारस्य ।।

२. मरणं प्रकृतिः शरीरिणां
विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्
यदि जन्तुर्ननु लाभवानसौ ।।

*(इ) पद्य**द्वयस्य** पदविभागं लिखत ।* ४

१. आस्वादवद्भिः कवलैस्तृणानां
कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैस्स्वैरगतैस्स तस्याः
सम्राट्समाराधनतत्परोऽभूत् ॥

२. अथान्धकारं गिरिगह्वराणां
द्रंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती
किञ्चिद्विहस्यार्थपतिं बभाषे ॥

(ई) ***एकस्य*** *अन्वयरचनां लिखत ।* ४

१. एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम् ॥

२. तस्मिन् क्षणे पालयितुः प्रजानाम्
उत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥

V. *(अ) कः कम् अवदत् इति संस्कृतेन लिखत ।* ६

१. हरः तपसि निमग्नः । तस्य मनः आकर्षणीयम् ।
२. रत्नं कमपि न अन्विष्यति । किन्तु जनाः रत्नम् अन्विष्यन्ति ।
३. त्वं सर्वभक्षकः भव । पवित्रम् अपवित्रं सर्वं भक्षय ।
४. यदि त्वं मां त्यजसि तर्हि त्वया प्रार्थितम् उपकारम् अहं करिष्यामि ।
५. तव शरीरं नास्ति । अतः त्वं मन्मथः न ।
६. सम्प्रति राजानः अत्र न आगच्छन्ति । किमर्थं राज्ञां गमनागमनं नास्ति ?

(आ) अन्त-लिङ्ग-विभक्ति-वचनानि लिखत । (षण्णाम्) ६

१. जगतः २. वपुः ३. अस्माभिः
४. धेन्वाम् ५. इयम् ६. हरये
७. प्रस्रविणी ८. गाम्

(इ) संस्कृतेन उत्तरं लिखत । ५

१. 'नाट्यशास्त्रम्' इति ग्रन्थः कदा केन लिखितः ?
२. नाटके कतिविधाः अभिनयाः भवन्ति ? ते के ?
३. प्रसिद्धकवयित्रीणां (तिसृणां) नामानि लिखत ।
४. दर्शनं नाम किम् ?
५. 'कविकुलगुरुः' कः ? तस्य त्रीणि नाटकानि कानि ?

(ई) प्रतिविषयं दशभिः वाक्यैः संस्कृतेन लघुटिप्पणीं लिखत - (द्वयोः) ५

१. माघः २. भर्तृहरिः ३. दण्डी ४. अश्वघोषः

(उ) एकं विषयम् अधिकृत्य संस्कृतेन दश वाक्यानि लिखत । ५

(१) सुभाषितानि (२) संस्कृतपत्रिकाः
(३) आरोग्यम् (४) भारतीयसंस्कृतिः

***

उत्तराणि

प्रथमः पाठः

अभ्यासाः

I. असमस्तपदानि - २, ७, १०, ११, १२, १४, १५, १८, १९, २०.

II. समस्तपदानि - देवकीनन्दनः, वृष्णिवंशप्रदीपः, मेघश्यामलः, कोमलाङ्गः, पृथ्वीभारनाशः

III. १. नदीतीरम् २. समुद्रतटः ३. भूमिगुणः ४. काककार्ष्ण्यम् ५. देवेन्द्रः ६. सुधाखण्डः ७. पाण्डुतनयः ८. गुरुपत्नी ९. मित्रगृहम् १०. देवपूजा ११. दीपप्रकाशः १२. कविरचना १३. चन्द्रदर्शनम् १४. जनसमूहः १५. नागेन्द्रः

IV. १. द्रोणस्य अपत्यं पुमान्, २. दुष्यन्तस्य अपत्यं पुमान्, ३. वरुणस्य अपत्यं पुमान्, ४. शकुन्तलायाः अपत्यं पुमान्, ५. गङ्गायाः अपत्यं पुमान्, ६. उत्तरायाः अपत्यं पुमान्, ७. अञ्जनायाः अपत्यं पुमान्, ८. कुन्त्याः अपत्यं पुमान्, ९. राधायाः अपत्यं पुमान्, १०. जनकस्य अपत्यं स्त्री, ११. अरुणस्य अपत्यं पुमान्, १२. धृतराष्ट्रस्य अपत्यं पुमान्

काव्यकथा

१. कालिदासेन रचितम् । २. अत्र लोककण्टकस्य तारकासुरस्य संहाराय शिवपार्वत्योः विवाहः, कुमारजननम्, तारकासुरस्य वधः इत्यादयः उप-वर्णिताः । ३. हिमालयस्य सरोवरतः पद्मानि नयन्ति । ४. 'इयं पार्वती हरस्य अर्धाङ्गिनी भविष्यति' इत्युक्तवान् ।

अन्तिमपृष्ठे स्थिताः

I. १. परोपकारार्थं यः जीवति सः एव वस्तुतः जीवति । २. सज्जनाः परोपकारार्थं जीवन्ति । ३. एषः आकारान्तः शब्दः । ४. उत्तरभागे भूम्याः मानदण्डः इव शोभते। ५. पार्वत्याः माता मेनादेवी । भ्राता मैनाकः । ६. रूपकेषु दश भेदाः सन्ति ।

II. १. ग्रन्थालयकुञ्चिका, २. सीतापुत्रः, ३. दाडिमबीजम्, ४. कृपणधनम्, ५. दासीपुत्रः

III. १. माद्र्याः अपत्यं पुमान्, २. पुत्रस्य अपत्यं पुमान्, ३. भगिन्याः अपत्यं पुमान्, ४. दितेः अपत्यं पुमान्, ५. अदितेः अपत्यं पुमान्, ६. सरमायाः अपत्यं पुमान् ।

IV. १. राघवः, २. शौरिः, ३. दौहित्रः, ४. वैनतेयः, ५. गार्गी, ६. पैतृष्वस्त्रीयः ।

द्वितीयः पाठः

भाषाभ्यासः

अ. १.प्र.त. २. च.त. ३. स.त. ४. स.त. ५. च.त. ६. पं.त. ७. ष.त. ८. तृ.त. ९. द्वि.त. १०. द्वि.त. ११. तृ.त. १२. तृ.त. १३. तृ.त. १४. ष.त. १५. तृ.त. १६. उपपद. १७. उपपद. १८. उपपद. १९. प्रादिसमासः २०. गतिसमासः

आ. १. हरित्रातः - तृ.त. २. क्षीरोदनः - तृ.त. ३. गुडमिश्रः - तृ.त. ४ मासावरः - तृ.त. ५. कूपपतितः - द्वि.त. ६. कुगतिः - कुसमासः ७. गोहितम् - च.त. ८. वृकभीतिः - पं.त. ९. वेदपण्डितः - स.त. १०. चक्रबन्धः - स.त. ११. कर्मकरः - उपपद. १२. संशयापन्नः द्वि.त. १३. अब्राह्मणः - नञ्त. १४. जलदः - उपपदसमासः १५. रणधीरः - स.त.

इ. १. अर्धं फलस्य २. नगरं गतः ३. धनेन मान्यः, ४. देशाय हितम्, ५. व्याघ्रात् भयम् ६. नृपस्य मन्दिरम् ७. रणे शूरः ८. न अश्वः, ९. कुत्सितं रूपम्, १०. अस्पष्टं स्पष्टं कृत्वा, १२. भाष्यं करोति इति.

ई. i) १. धैर्यम्, धीरता, धीरत्वम् २. वीर्यम्, वीरता, वीरत्वम् ३. माधुर्यम्, मधुरता, मधुरत्वम् ४. लावण्यम्, लवणता, लवणत्वम् ५. काठिन्यम्, कठिनता, कठिनत्वम् ६. सौन्दर्यम्, सुन्दरता, सुन्दरत्वम्

ii) १. दण्डी, दण्डवान्, २. धनी, धनवान्, ३. बली, बलवान्, ४. चक्री, चक्रवान्, ५. शिखी, शिखावान्, ६. शूली, शूलवान्,

iii) १. शक्तिमान्, शक्तिमती २. धृतिमान्, धृतिमती ३. मतिमान्, मतिमती ४. बुद्धिमान्, बुद्धिमती ५. कान्तिमान्, कान्तिमती

काव्यकथा

१. मन्मथस्य पत्नी रतिः । २. 'अनन्यभाजं पतिम् आप्नुहि' इति । ३. मन्मथः दग्धः इति कारणेन । ४. तपसः विघ्नः समुत्पन्नः इति कारणतः ।

अन्तिमपृष्ठे स्थिताः

I. १. परकृतिनिकृतिं सः न सहते । २. अकार्यं न कर्तव्यम् ३. रेफान्तः 'धुर्'शब्दः स्त्री. स.वि. ए.व. ४. पुष्पैः निर्मितम् । ५. शिवः क्रोधेन मदनं दग्धवान् । ६. ओजोगुणः भवति ।

II. १. कारुण्यम्, करुणता, करुणत्वम् २. स्थौल्यम्, स्थूलता, स्थूलत्वम् ३. वैराग्यम्, विरागता, विरागत्वम् ४. वैधुर्यम्, विधुरता, विधुरत्वम् ५. नैर्भर्यम्, निर्भरता, निर्भरत्वम्

III. १. स्वर्गपतितः - पं.त. २. कृष्णश्रितः - द्वि.त. ३. रत्नाकरः - ष.त. ४. दानशूरः - स.त. ५. कुण्डलहिरण्यम् - च.त.

तृतीयः पाठः

भाषाभ्यासः

. १. विशेषणपू.प. २. विशेषणपू.प. ३. विशेषणपू.प. ४. विशेषणपू.प. ५. उपमानपू.प. ६. उपमानोत्तरप. ७. सम्भावनापू.प. ८. मध्यमप.लो. ९. अवधारणापू.प. १०. अवधारणापू.प. ११. मध्यमप.लो. १२. उपमानोत्तर.प. १३. विशेषणपू.प. १४. विशेषणपू.प. १५. सम्भावनापू.प.

II. १. कैलासाद्रिः - सम्भावनापू.प. २. अयोध्यानगरी - सम्भावनापू.प. ३. गुरुदेवः - अवधारणापू.प. ४. वज्रकठोरम् - उपमानपू.प. ५. प्रथमपुरुषः - विशेषणपू.प. ६. महादेवः - विशेषणपू.प. ७. कुसुमकोमलम् - उपमानपू.प. ८. मुखपद्मम् - उपमानोत्तरप. ९. पुराणपुरुषः - विशेषणपू.प. १०. करकमलम् - उपमानोत्तरप.

III. १. दृढतरम् दृढतमम् २. सुलभतरः सुलभतमः ३. वत्सलतरा वत्सलतमा ४. सुकुमारतरम् सुकुमारतमम् ५. स्थूलतरा स्थूलतमा ६. कृशतरः कृशतमः ७. शोभनतरा शोभनतमा ८. कठिनतरम् कठिनतमम् ९. विशालतरा विशालतमा १०. कठोरतरः कठोरतमः ११. रूक्षतरः रूक्षतमः १२. दुर्बलतरा दुर्बलतमा १३. प्रबलतरम् प्रबलतमम् १४. तीक्ष्णतरा तीक्ष्णतमा १५. त्वरिततरः त्वरिततमः

IV. १. सुन्दरतमा २. श्रेष्ठतमा ३. पवित्रतमा ४. कृशतरा ५. गुणवत्तमः ६. दीर्घतरः ७. कर्कशतरः ८. समीपतमः ९. उन्नततमः १०. मधुरतमम् ११. लघुतरः १२. पटुतमः १३. क्रूरतमः १४. बलवत्तमः १५. दूरतरम् १६. मधुरतमः

काव्यकथा

१. तपश्शक्त्या ईश्वरः आराधनीयः इति सा सङ्कल्पितवती ।

२. तपसे सा गौरीशिखरं गतवती । राजकुलोचितानि भूषणानि परित्यज्य वल्कलं धृतवती । ३. पार्वती प्रथमं फलानि खादति स्म । ततः तानि परित्यज्य पर्णानाम् आहारं स्वीकृतवती । पश्चात् तदपि त्यक्तवती । अतः 'अपर्णा' इति नाम ।

४. परमेश्वरः ब्रह्मचारिरूपेण आगतवान् ।

अन्तिमपृष्ठस्य प्रश्नाः

I. १. सङ्गीतसाहित्यकलाविहीनः मनुष्यः साक्षात् पशुः । २. शिवः पार्वत्याः भक्त्या प्रीत्या च सन्तुष्टः । ३. 'प्रसूनम्' इत्युक्ते पुष्पम् । ४. आर्यभटः, भास्कराचार्यः च ।

II. १. कपिकुञ्जरः - उपमानोत्तर- २. चरमश्लोकः - विशेषणपूर्व- ३. सद्वैद्यः - विशेषणपूर्व- ४. राजेन्द्रः - उपमानोत्तर- ५. पुरुषर्षभः - उपमानोत्तर-

III. १. कठिनतरः कठिनतमः २. क्लिष्टतरम् क्लिष्टतमम् ३. दीर्घतरा दीर्घतमा ४. ह्रस्वतरम् ह्रस्वतमम् ५. मृदुतरः मृदुतमः ६. गम्भीरतरा गम्भीरतमा

चतुर्थः पाठः

भाषाभ्यासः

II. १. समाहारद्विगुः २. इतरेतरः ३. इतरेतरः ४. इतरेतरः ५. द्विगुः ६. इतरेतरः ७. इतरेतरः ८. इतरेतरः ९. समाहारः १०. समाहारः ११. इतरेतरः १२. इतरेतरः

II. १. धर्मश्च अर्थश्च कामश्च मोक्षश्च – इतरेतरः २. शब्दश्च अर्थश्च – इतरेतरः ३. शङ्खश्च चक्रश्च गदा च पद्मश्च – इतरेतरः ४. गौरी च शङ्करश्च – इतरेतरः ५. हरिश्च हरश्च – इतरेतरः ६. पञ्चानां रात्रीणां समाहारः – द्विगुः ७. अष्टानाम् अध्यायानां समाहारः – द्विगुः ८. ब्राह्मणश्च क्षत्रियश्च वैश्यश्च शूद्रश्च – इतरेतरः ९. घटश्च पटश्च अनयोः समाहारः – समाहारद्वन्द्वः १० सुखं च दुःखं च – इतरेतरः ११. फलानि च पुष्पाणि च – इतरेतरः १२. त्रयाणां पादानां समाहारः – द्विगुः १३. कामश्च क्रोधश्च – इतरेतरः १४. क्षुत् च पिपासा च – इतरेतरः १५. जन्म च मृत्युः च – इतरेतरः

III. १. चतुर्वेदी, द्विगुः २. सप्ताहः, द्विगुः ३. कन्दमूलफलानि, इतरेतरः ४. लक्ष्मी-सरस्वत्यौ, इतरेतरः ५. नटनटीसूत्रधाराः, इतरेतरः ६. नवरात्रम्, द्विगुः ७. जयापजयौ, इतरेतरः ८. शुभाशुभम्, समाहारद्वन्द्वः ९. पापपुण्ये, इतरेतरः १०. वृक्षपर्णलताः, इतरेतरः ११. युधिष्ठिरार्जुनौ, इतरेतरः १२. नकुलसहदेवौ, इतरेतरः

IV. (i) १. लेखयति, लेखयिष्यति, अलेखयत् २. मेलयति, मेलयिष्यति, अमेलयत् ३. ज्ञापयति, ज्ञापयिष्यति, अज्ञापयत् ४. श्रावयति, श्रावयिष्यति, अश्रावयत् ५. स्मारयति, स्मारयिष्यति, अस्मारयत् ६. गमयति, गमयिष्यति, अगमयत् ७. स्थापयति, स्थापयिष्यति, अस्थापयत् ८. पाययति, पाययिष्यति, अपाययत् ।

(ii) १. पाययित्वा, पाययितुम्, पायितवान् २. दापयित्वा, दापयितुम्, दापितवान् ३. पाठयित्वा, पाठयितुम्, पाठितवान् ४. हासयित्वा, हासयितुम्, हासितवान् ५. दर्शयित्वा, दर्शयितुम्, दर्शितवान् ६. चालयित्वा, चालयितुम्, चालितवान्

V. १. पाययति २. पातयति ३. पाठयामि ४. अगमयत् ५. स्मारयति ६. दापयति ७. कारयित्वा, गमयति ८. श्रावयति ९. प्रापयति १०. उपवेशयति ११. स्थापयति १२. अलेखयत् १३. श्रावयित्वा, हासयति १४. आनाययति १५. तारयितुम्

काव्यकथा

१. कन्यां याचितुं सप्त ऋषयः गताः । २. वधूवरौ पितामहं ब्रह्माणं नमस्कृतवन्तौ । ३. देवानां सन्देशं अग्निः शिवाय नीतवान् । ४. अग्निः हरतेजः गङ्गायां प्रक्षिप्तवान् ।

अन्तिमपृष्ठे स्थिताः

१. १. सन्तः पापं तापं दैन्यं च घ्नन्ति । २. 'हे कल्याणि वीरपुत्रं प्राप्नुहि' इति आशीर्वादं कृतवान् । ३. तारकासुरस्य पीडा प्रत्यहम् अधिका जाता । अतः देवाः दुःखिताः । ४. गङ्गायाः प्रपातः, षष्ठीतत्पुरुषः । ५. 'इष्' इति धातुः । ६. तिरुमलाम्बा ।

२. १. खादयति २. ज्ञापयति ३. दर्शयति ४. कारितवती ५. विकासयिष्यति

३. १. ग्रीष्मवसन्तौ, इतरेतरः २. कृत्तिकारोहिण्यौ, इतरेतरः ३. गोव्याघ्रम्, समाहारद्वन्द्वः

पञ्चमः पाठः

भाषाभ्यासः

I. १. उन्नतशिखरः, समानाधिकरणः २. दण्डहस्तः, व्यधिकरणः ३. कुसुमहस्ताः, व्यधिकरणः ४. अबलाः, नञ्बहुव्रीहिः ५. अवस्त्रः, नञ्बहुव्रीहिः ६. सहरिः, सहपूर्वपदः ७. समित्रः, सहपूर्वपदः ८. शङ्खपाणिः, व्यधिकरणः ९. रिक्तहस्तः, समानाधिकरणः १०. चापहस्तः, व्यधिकरणः ११. चक्रपाणिः, व्यधिकरणः १२. सभार्यः, सहपूर्वपदः १३. सशस्त्रः, सहपूर्वपदः १४. विद्याधनाः, समानाधिकरणः १५. चन्द्रमौलिः, व्यधिकरणः १६. निर्मलहृदयः, समानाधिकरणः १७. कृशाङ्गः, समानाधिकरणः १८. सपरिवारा, सहपूर्वपदः

II. १. रक्तं वस्त्रं यस्य सः - समानाधिकरणः २. चर्म अम्बरं यस्य सः - समानाधिकरणः ३. कोमलानि अङ्गानि यस्य सः - समानाधिकरणः ४. श्वेतानि अम्बराणि यासां ताः - समानाधिकरणः ५. यशः धनं यस्य सः - समानाधिकरणः ६. विषं कण्ठे यस्य सः - व्यधिकरणः ७. फाले नेत्रं यस्य सः - व्यधिकरणः ८. न विद्यते निद्रा यस्य सः - नञ्बहुव्रीहिः ९. कुटुम्बेन सह वर्तते इति, सहपूर्वपदः १०. धनेन सहिताः - नञ्बहुव्रीहिः ११. मोदकं हस्ते यस्य सः - व्यधिकरणः १२. स्थूलं शरीरं यस्य सः - समानाधिकरणः

III.. १. गन्तुम् इच्छति २. कर्तुम् इच्छति ३. दातुम् इच्छति ४. विजेतुम् इच्छति ५. हन्तुम् इच्छन्ति ६. आप्तुम् इच्छन्ति ७. वक्तुम् इच्छन्ति ८. भवितुम् इच्छन्ति

IV. १. गन्तुम् इच्छा २. तरीतुम् इच्छा ३. श्रोतुम् इच्छा ४. भवितुम् इच्छा ५. कर्तुम् इच्छा ६. ज्ञातुम् इच्छा ७. जेतुम् इच्छा ८. द्रष्टुम् इच्छा ९. पातुम् इच्छा १०. मोक्तुम् इच्छा

V. १. जिघृक्षा, जिघृक्षुः २. जिघत्सा, जिघत्सुः ३. जिगीषा, जिगीषुः ४. पिपृच्छिषा, पिपृच्छिषुः ५. तितीर्षा, तितीर्षुः ६. ईप्सा, ईप्सुः ७. लिलिखिषा, लिलिखिषुः ८. जिघांसा, जिघांसुः ९. पिपठिषा, पिपठिषुः १०. रिरक्षिषा, रिरक्षिषुः

काव्यकथा

१. गङ्गा कृतवती । २. शूरं, तेजस्विनम्, आयुधधारिणं कुमारं दृष्टवन्तः । ३. 'तारकवधार्थं कुमारं प्रेषयतु' इति प्रार्थितवान् । ४. 'सेनाधिपति'पदे अभिषिक्तः । ५. युद्धे तारकासुरं कुमारः मारितवान् ।

अन्तिमपृष्ठे स्थिताः

I. १. कर्तारम् २. सपरिवारः ३. अनन्तभट्टः ४. सुषुप्सा

II. १. धनुः पाणौ यस्य सः - व्यधिकरणः २. वक्रं पुच्छं यस्य सः - समानाधिकरणः ३. सुन्दरौ बाहू यस्य सः - समानाधिकरणः ४. भग्नः पादः यस्य सः - समानाधिकरणः ५. कलुषितं हृदयं यस्य सः - समानाधिकरणः ६. स्मितं वदनं यस्य सः - समानाधिकरणः ७. लम्बम् उदरं यस्य सः - समानाधिकरणः ८. शरेण सहितम् - सहपूर्वपदः

III. १. तरीतुम् इच्छन्ति २. ग्रहीतुम् इच्छन्ति ३. अत्तुम् इच्छन्ति ४. नेतुम् इच्छन्ति ५. ज्ञातुम् इच्छन्ति

षष्ठः पाठः

भाषाभ्यासः

I. १. उपनगरम् २. अध्यात्मम् ३. यथाविधि ४. प्रतिवनम् ५. अनुगुणम् ६ निर्मक्षिकम् ७. प्रतिजनम् ८. यथासंख्यम् ९. प्रत्यर्थम् १०. यथादेशम्

II. १. मतिम् अनतिक्रम्य २. भयस्य अभावः ३. विद्यालये विद्यालये ४. कृष्णस्य समीपे ५. क्रमम् अनतिक्रम्य ६. दिने दिने ७. वनस्य समीपे ८. मासे मासे ९. दोषाणाम् अभावः १०. अधिलोकम्

III. १. उपग्रामम् २. यथामति ३. प्रतिग्रामम् ४. प्रतिगृहम् ५. प्रतिसदनम् ६. उपकुटीरम् ७. यथाशास्त्रम् ८. यथाबोधनम् ९. यथाक्रमम् १०. उपाचार्यम्

IV.

उपमानम्	*उपमेयम्*	*वाचकः*	*साधारणधर्मः*
१. चन्द्रः	मुखम्	वत्	सौन्दर्यम्
२. प्रासादः	गृहम्	इव	वैशाल्यम्
३. हिमम्	पयोहिमम्	इव	शीतलत्वम्
४. कमलदले	तस्याः नेत्रे	सदृशे	(वैशाल्यम्)
५. कोकिलध्वनिः	तस्य ध्वनिः	इव	(माधुर्यम्)

काव्यकथा

१. नलः निषधदेशस्य राजा । २. दमयन्ती भीमराजस्य सुता । ३. नलः सरोवरे काष्ठमूर्तिः इव अतिष्ठत् । ४. नलदमयन्त्योः विवाहकार्यसाधनाय हंसः विदर्भदेशम् अगच्छत् । ५. नैषधीयचरितं श्रीहर्षेण लिखितम् ।

अन्तिमपृष्ठे स्थिताः

I. १. अलङ्काराः द्विविधाः । २. यत्र उपमायां साधारणधर्मादयः न दृश्यन्ते सा लुप्तोपमा । ३. जीवः, आत्मा, पुण्यम् - इत्यादीनां परोक्षवस्तूनां, वस्तुस्वभावानां च चिन्तनं भवति । ४. जैनबौद्धादीनि दर्शनानि वेदप्रामाण्यं न अङ्गीकुर्वन्ति । अतः तानि नास्तिकदर्शनानि ।

II.

उपमानम्	*उपमेयम्*	*वाचकः*	*साधारणधर्मः*
१. दीपशिखा	लक्ष्मीः	इव	चञ्चलत्वम्
२. बृहस्पतिः	पण्डितः	इव	बुद्धिमत्त्वम्
३. कुबेरः	महाराजः	वत्	धनाढ्यत्वम्

III. १. धनं च मानश्च - इतरेतरद्वन्द्वः २. निषधः इति देशः - सम्भावनापूर्वपद-कर्मधारयः ३. देशस्य अधिपः - षष्ठीतत्पुरुषः ४. हंसेषु श्रेष्ठः - सप्तमी-तत्पुरुषः ५. सिंहस्य समीपे - अव्ययीभावः ।

सप्तमः पाठः

भाषाभ्यासः

I. १. - इ, २. - ऊ, ३. - ऋ, ४. - उ, ५. - अ, ६. - ई, ७. - आ,

II. १. (अ) नञ्तत्पुरुषः (आ) नञ्बहुव्रीहिः

२. (अ) नञ्बहुव्रीहिः (आ) नञ्तत्पुरुषः

३. (अ) बहुव्रीहिः (आ) वि.पू.कर्मधारयः

४. (अ) बहुव्रीहिः (आ) तृतीया तत्पुरुषः

५. (अ) बहुव्रीहिः (आ) वि.पू. कर्मधारयः

III. (अ) 'सुजनो न याति ....' इत्येषः सामान्यः । 'छेदेऽपि चन्दनतरुः ....' इत्येषः विशेषः । विशेषेण सामान्यस्य समर्थनं कृतम् ।

(आ) कमलम् - उपमानम्, पादः - उपमेयम् । उपमानोपमेययोः अभेदः वर्णितः ।

(इ) 'माधव'पदे श्लेषः । १. माधवः = कृष्णः २. माधवः = वसन्तऋतुः

IV. १. - ऌ, २. - उ, ३. - अ, ४. - ऐ, ५. - ए, ६. - आ, ७. - इ, ८. - ई, ९. - ऊ १०. - ऋ

काव्यकथा

१. विदर्भदेशस्य राजधानी कुण्डिनपुरम् । २. विरहपीडाकारणतः दमयन्ती कृशा जाता । ३. स्वयंवरपद्धत्या विवाहः निर्वर्तनीयः इति मन्त्रिणः अवदन् । ४. दमयन्त्याः स्वयंवरवार्तां श्रुत्वा नारदः अमरावतीं गतवान् । ५. नलः मायाशरीरेण दमयन्तीसमीपं गतवान् ।

अन्तिमपृष्ठे स्थिताः

I. १. अशुद्धम् २. अशुद्धम् ३. अशुद्धम् ४. शुद्धम् ५. अशुद्धम् ६. शुद्धम् ७. अशुद्धम् ८. अशुद्धम् ९. शुद्धम् १०. शुद्धम्

II. अ) उपमालङ्कारः आ) रूपकालङ्कारः इ) अर्थान्तरन्यासः

(ई) अतिशयोक्तिः

III. १. शास्त्रं जानाति इति - उपपदसमासः २. समासस्य नाम - षष्ठीतत्पुरुषः ३. मुखम् एव चन्द्रः - अवधारणापूर्वपदः कर्मधारयः ४. धनेन सह वर्तते इति सधनः - सहपूर्वपदबहुव्रीहिः ५. मक्षिकाणाम् अभावः - अव्ययीभावः (अभावार्थकः)

अष्टमः पाठः

भाषाभ्यासः

I. १. (अ) कर्णश्च अर्जुनश्च कर्णार्जुनौ (आ) कर्णार्जुनयोः युद्धम् २. (अ) संस्कृतस्य साहित्यम् संस्कृतसाहित्यम् (आ) संस्कृतसाहित्यस्य परिचयः ३. (अ) पवित्रं च तत् तीर्थं च पवित्रतीर्थम् (आ) पवित्रतीर्थे स्नानम् ४. (अ) देवस्य सेवा देवसेवा (आ) देवसेवायाः भाग्यम् ५. (अ) धनस्य लाभः धनलाभः (आ) धनलाभेन मुदितः

II. १. (अ) काव्यस्य पठनम् काव्यपठनम् - ष.त. (आ) काव्यपठनस्य अभ्यासः काव्यपठनाभ्यासः - ष.त. २. (अ) निद्रायाः अभावः निद्राभावः - ष.त. (आ) निद्राभावः एव समस्या निद्राभावसमस्या - अवधारणापूर्वपदः क. धा (इ) निद्रा..समस्यया ग्रस्तः - निद्रा....ग्रस्तः - तृ.त. ३. (अ) सुन्दरं च तत् नृत्यं च सुन्दरनृत्यम् - क.धा (आ) सुन्दरनृत्यस्य दर्शनम् सुन्दरनृत्यदर्शनम् - ष.त. (इ) सुन्दरनृत्यदर्शनस्य भाग्यम् - सुन्दरनृत्यदर्शनभाग्यम् - ष. त. ४. (अ) परिसरस्य मालिन्यम् परिसरमालिन्यम् - ष. त.(आ) परिसरमालिन्येन जातः परिसरमालिन्यजातः - तृ. त. (इ) परिसरमालिन्यजातः दोषः परिसरमालिन्यजातदोषः - कर्मधारयः ५. (अ) दूरवाण्याः शब्दः दूरवाणीशब्दः - ष. त. (आ) दूरवाणीशब्दस्य श्रवणम् - दूर...श्रवणम् - ष. त. (इ) दूर...श्रवणस्य समनन्तरम् - ष. त.

III. १. –∪– २. ∪–∪– ३. –∪– ४. ∪∪∪– ५. –∪∪–– ६. –∪– ७. ––∪ ८. ∪∪– ९. –∪– १०. ∪∪–

IV. १. –∪– = रगणः, २. ∪–– = यगणः ३. ––– = मगणः ४. –∪∪ = भगणः, ५. ∪∪– = तगणः ६. ∪–∪ = जगणः ७. ––∪ = तगणः ८.∪∪– = सगणः ९. ∪∪∪ = नगणः १०. ––– = मगणः

V. १. लघुः २. त्रीणि ३. गुरुः ४. गुरुः ५. त्रीणि

काव्यकथा

१. दिक्पालकाः इन्द्रः, वरुणः, अग्निः, यमः च दूतीं प्रेषितवन्तः । २. यदि दमयन्ती इन्द्रं वृणुयात् तर्हि लक्ष्मीः याता भवेत् । ३. दिक्पालाः पूजार्हाः । अतः ते वरणार्हाः न । ४. यदा दमयन्ती रोदनं कृतवती तदा नलः आत्मानं परिचायितवान् ।

अन्तिमपृष्ठे स्थिताः

I. १. अ. उत्तमाः जनाः, आ. उत्तमजनानां सहवासः २. अ. रमायाः कान्तः, आ. रमाकान्तस्य भक्तः ३. अ. नीलं कण्ठे यस्य सः, आ. नीलकण्ठस्य सेवा, इ. नीलकण्ठसेवया सन्तृप्तः

II. –––– ∪ –––– ∪–∪ ∪–∪–

∪ – ∪ – ∪––––– ∪ ∪ ∪–∪ ∪–

III. १. अमरशक्तेः त्रीन् पुत्रान् षड्भिः मासैः राजनीतिनिपुणान् कर्तुं विष्णुशर्मा पञ्चतन्त्रं रचितवान् । २. बृहत्कथा भूतभाषया लिखिता । ३. क्षेमेन्द्रः बृहत्कथामञ्जरीं लिखितवान् । ४. शोकदग्धस्य सुहृद्दर्शनम् औषधम् । ५. कार्यस्य आरम्भे सुहृद्भिः

नवमः पाठः

भाषाभ्यासः

अभ्यासः

I. १. दशमी कक्ष्या - दशमकक्ष्या - विशेषणपूर्वपदः कर्मधारयः, त्रैमासिकी परीक्षा - त्रैमासिकपरीक्षा - विशेषणपूर्वपदः कर्मधारयः, दशमकक्ष्यायाः त्रैमासिकपरीक्षा दशम...परीक्षा - षष्ठीतत्पुरुषः
२. मुख्यः चासौ मन्त्री च - मुख्यमन्त्री - कर्मधारयः, कार्यस्य आलयः - कार्यालयः - षष्ठीतत्पुरुषः, मुख्यमन्त्रिणः कार्यालयः - मुख्यमन्त्रिकार्यालयः - षष्ठीतत्पुरुषः
३. विद्यायाः आलयः - विद्यालयः - षष्ठीतत्पुरुषः, क्रीडायाः अङ्गणम् - क्रीडाङ्गणम् - षष्ठीतत्पुरुषः, विद्यालयस्य क्रीडाङ्गणम् - विद्यालयक्रीडाङ्गणम् - षष्ठीतत्पुरुषः

II. १. ∪∪∪ = नगणः , ∪__ = यगणः, २. _∪_ = रगणः, _∪_ = रगणः ३. _∪_ = रगणः, ∪∪_ = सगणः, _∪_ = रगणः ४. ∪_∪ = जगणः, ___ = मगणः, ५. ∪_∪ = जगणः, _∪_ = रगणः
६. _∪_ = रगणः, _∪_ = रगणः, ∪__ = यगणः ७. __∪ = तगणः, ∪_∪ = जगणः, ___ = मगणः, _∪_ रगणः ८. __∪ = तगणः, ___ = मगणः, _∪∪ = भगणः, _∪_ = रगणः

III. १. ∪_∪ / __∪ / ∪_∪ / __ = जगणः, तगणः, जगणः, गुरुद्वयम् = उपेन्द्रवज्रावृत्तम्
२. __∪ / _∪∪ / ∪_∪ / ∪_∪ / __ = तगणः, भगणः, जगणः, जगणः, गुरुद्वयम् = वसन्ततिलकावृत्तम् । ३. __∪ / __∪ / ∪_∪ / __ = तगणः, तगणः, जगणः, गुरुद्वयम् = इन्द्रवज्रावृत्तम् ४. __∪ / __∪ / ∪_∪ / __ = तगणः, तगणः, जगणः, गुरुद्वयम् = इन्द्रवज्रावृत्तम्

काव्यकथा

१. 'भूलोकं गच्छ' इति विष्णुः सरस्वतीम् उक्तवान् । २. महेन्द्रादयः दिक्पालाः नलवेषं धृतवन्तः । ३. देवानाम् अनुग्रहेण दमयन्त्या सरस्वत्याः क्लिष्टकरं वर्णनम् अवगतम् । ४. दमयन्ती नलं वृतवती इति अन्ये राजानः क्रुद्धाः । ५. सरस्वती नलाय चिन्तामणिमन्त्रं दत्तवती ।

अन्तिमपृष्ठे स्थिताः

I. १. मरणं प्रकृतिः, विकृतिः जीवितम् । २. हंसः जलमयक्षीरात् क्षीरं यथा पृथक्कृत्य गृह्णाति तथा सारः ग्रहीतव्यः । ३. 'उत्तिष्ठ वत्स !' इत्येतत् अमृतायमानं वचनम् । ४. अनुष्टुप्छन्दसि ३२(प्रतिपादम् अष्ट) अक्षराणि भवन्ति । ५. अमरकोषस्य वास्तविकं नाम 'नामलिङ्गानुशासनम्' इति ।

II. १. दिशां पालाः - षष्ठीतत्पुरुषः, २. पुष्पाणां वृष्टिः - षष्ठीतत्पुरुषः, ३. दश कण्ठाः यस्य सः - बहुव्रीहिः, दशकण्ठेन नीता - दशकण्ठनीता - तृतीयातत्पुरुषः, ४. रघूणां नाथः - षष्ठीतत्पुरुषः, रघुनाथस्य दूतः - षष्ठीतत्पुरुषः ५. भीमः इति राजा - सम्भावनापूर्वपदः कर्मधारयः, भीमराजस्य पुत्री - षष्ठीतत्पुरुषः

III. १. उ, २. इ, ३. अ, ४. आ, ५. ई.

दशमः पाठः

भाषाभ्यासः

अभ्यासः

I. १. देवरायराजः, २. गणराजः, ३. अयोध्याराजः, ४. शास्त्रिगृहम् ५. शर्मवर्यः ६. फलपुष्पे ७. शाखोपशाखे ८. गोविन्दसखः ९. उत्तमसखः १०. मुखनासिकम् ।

II. १. षकारः - इकारः, २. रेफः - आकारः, ३. षकारः - उकारः, ४. रेफः - उकारः, ५. रेफः - आकारः, ६. रेफः - आकारः, ७. ऋकारः - तकारः ८. रेफः - आकारः ९. रेफः - अकारः १०. षकारः - ककारः

III. १. व् + ए, २. म् + ई, ३. ग् + आ, ४. अ + व् + इ, ५. आ + य् + अ, ६. अ + म् + अ, ७. आ + ह् + आ, ८. अ + व् + य् + ए, ९. इ + य् + अ + म् + आ, १०. ऊ + प् + य् + अ + क् + आ ।

IV. १. चक्रवाकाणाम्, २. नरेशेन, ३. वाहकानाम् ४. कारकाणाम् ५. धर्मदर्शिना ६. बन्धकानाम् ७. मरीचिकानाम् ८. अर्हाणाम् ९. महिषीणाम् १०. वारिजेन

काव्यकथा

१. कलिपुरुषस्य सैन्ये चार्वाकः, बौद्धः, द्वापरः, अन्ये च आसन् । २. 'नलमहाराजं राज्यभ्रष्टं करोमि, तस्य भैमीवियोगं च साधयामि' इति कलिः प्रतिज्ञाम् अकरोत् । ३. देशे सर्वत्र नलप्रभावः आसीत् इत्यतः कलिः निस्तेजस्कः अभवत् । ४. देवताराधनं, विद्वत्सम्माननं, प्रजारञ्जनम् इत्यादीनि राजोचितकार्याणि नलः निर्वर्तयति स्म ।

अन्तिमपृष्ठे स्थिताः प्रश्नाः

I. १. विदर्भदेशराजः २. धनिकार्यालयः ३. त्रिपाठिकथनम् ४. चतुर्वेदिमहोदयः ५. वाजपेयिवर्यः

II. १. तकारः २. दकारः ३. तकारः ४. धकारः ५. जकारः ६. चकारः ७. जकारः

III. १. प्रीतिः मरणान्ता स्यात्, कोपः क्षणकालं स्यात् । २. सूनृता वाक् अलक्ष्मीं दूरीकरोति, कीर्तिं प्रसूते च ।३. इदानीं संस्कृतक्षेत्रे ५० - ६० पत्रिकाः सन्ति । ४. कादम्बरी गुणाढ्यस्य बृहत्कथाम् आधारीकृत्य लिखिता । ५. गुरौ भक्तिः, धेन्वाम् अनुकम्पा इत्येतौ नन्दिन्याः तोषकौ दिलीपस्य गुणौ ।

परिशिष्टम् - १

These matters are only for information. Questions on these points will not be asked in the exam.

Why Propagation of Samskrit ? - 1

THE LANGUAGES OF INDIA AND SAMSKRIT

We all know that the Indian languages down the ages have become well established because of the strength Samskrit has provided to them. They have obtained contribution from Samskrit in their origin, formation of words, evolution and nourishment. They have received the power of Samskrit in complete measure. What they themselves have contributed to Samskrit is a different question altogether. What they have received from Samskrit is definitely plenty.

This is the past. What is the situation now ? What shall be the future like ?

Even now the very life of the Indian languages is dependent on Samskrit. We will not be able to understand as to how the words in our languages convey our intentions if we do not take recourse to the division of Prakruti and Pratyaya, the root and the affix of Samskrit.

In all the Indian languages there exist new and ancient literature written respectively in new and old languages as in Kannada. The older literature is mostly Samskritic. Can we understand that without knowing Samskrit ? The need for new words is there for all Indian languages. This is a constant necessity. If we do away with Samskrit where do we go for this ? Which language can assist us ? New words can be coined only in Samskrit. This capacity is found in a very little measure in the other Indian languages. If we do not like to use Samskrit for this purpose we will have to import, without any shame, innumerable foreign words in whole measures into our languages. By importing such words which do not fit into our traditions and which are not coined in conformity with our culture and ethos, our very identity is lost. What do we achieve by borrowing these foreign words at the cost of our self-esteem ?

The honour of India rests on her philosophy. The reason why foreigners look at us with awe and envy is due to our rich philosophy. Only when our philosophical thoughts come down to us along with the original flavour of Samskrit assimilated in our modern languages, can life in India become beautiful and well cultured. The values contained here in, are the very foundation of our lives. Samskrit is a stream that never dries up. In this way there exists an inseparable relation between Samskrit and Indian languages. It is our duty to see that it is never delinked from our lives. We should take care to see that in this land the mother root of our culture does not dry up or rupture. "छिन्ने मूले नैव वृक्षो, न शाखा" - when the root is cut off there will be no tree and no branches.

Why Propagation of Samskrit ? - 2

THE PURITY IN LANGUAGE AND SAMSKRIT

Every body desires that the language he speaks is pure. But by just wishing one cannot fulfil a desire. An easy way to fulfil this desire is to obtain atleast some knowledge of Samskrit.

Imagine that you are walking along in a market place. Your eyes catch a sign of a hotel. It is written there as 'Upahaara mandira'. Is it correct to say 'upahaara' or 'upaahaara' ? Quite likely the writing there may be 'Palahaara mandira'. Is this 'palahaara', 'phalahaara', or 'phalaahaara' ? Which is correct ? You are not a non-vegetarian. Hence your desire is to go to a hotel where non-vegetarian food is not served. In the meanwhile you will come across another word 'shakhaahara' ? Is this 'shakhaahara' or shakaahaara ? All of these lead to confusion.

Upaahaara means food that is not the main meal ie., snacks. Upahaara means a gift. Phala actually means a fruit. You know the difference between hara 'garland' and aahaara which means 'food'. Palahaara is a 'garland of meat' and phalahaara is a garland of fruits. By phalaahaara you can mean a meal of fruits and the like. Shakhaa is a branch. Shaka is a vegetable. Therefore shaakhaahaara means a meal of branches. Shaakaahaara is vegetarian food.

We can present this in the form of a table

Incorrect ✗	Correct ✔
उपहारमन्दिरम्	उपाहारमन्दिरम्
पलहारमन्दिरम् फलहारमन्दिरम्	फलाहारमन्दिरम्
शाखाहारमन्दिरम्	शाकाहारमन्दिरम्

We can go on giving any number of Such correct and incorrect forms. But it is a futile exercise. If you want some idea of these correct and incorrect forms it is imperative that you should be acquainted with Samskrit.

It is not for the upliftment of Samskrit that we should learn Samskrit. Samskrit learning is needed even to maintain the purity of our mother tongue. You may ask "Why should we take the trouble to know all this ? We will continue to speak as we wish."

Generally our mind is not inclined to make any effort. It loves to be lazy. If we are unwilling to make an effort to know the correct words, one day our mother tongue is bound to become fully corrupted. Then we will have to regret our own folly in not acting earlier.

Therefore, let us remember that Samskrit is needed to maintain the purity of our own Indian languages.

Why Propagation of Samskrit ? - 3

CONSERVATION OF THE SHASTRAGRANTHAS OF SAMSKRIT

Samskrit language is an ocean of knowledge. Here lie many a technical work or Shastragranthas. Everyone of these Shastras is vast. In the whole life span of a person only one Shastra can be studied extensively. Such is the vastness of the Shastras.

